*BENARES SANSKRIT SERIES;*

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH M. A.,

DIRECTOR OF PUBLIC INSTRUCTION, N. W. P. & OUDH,

& G. THIBAUT PH. DR.,

PRINCIPAL, BENARES COLLEGE.

*No. 9.*


# सांख्यकारिका ।

## नारायणतीर्थविरचितया चन्द्रिकाव्याख्यया गौडपादाचार्यविरचितेन भाष्येण च सहिता ।

# THE SÁŃKHYAKÁRIKÁ,

WITH AN EXPOSITION CALLED CHANDRIKÁ

BY NÁRÁYAṆA TÍRTHA,

AND GAUḌAPÁDÁCHÁRYA'S COMMENTARY.


EDITED BY PAṆḌIT BECHANARÁMA TRIPÁṬHI,

PROFESSOR OF SÁŃKHYA, SANSKṚIT COLLEGE, BENARES.



*BENARES:*

**PUBLISHED BY MESSRS. BRAJ B. DAS & CO.**

PRINTED AT THE BENARES PRINTING PRESS.

1883.



**Registered according to Act XXV. of 1867.**

## ॥ श्रीः ॥

# सांख्यचन्द्रिकागौडपादाचार्यकृतभाष्ययोर्भूमिका ।

अज्ञानध्वान्तभानुर्निखिलनिजजनाघौघकक्षे कृशानु-
स्तत्त्वज्ञात्रादिमूर्तिर्जगति निजकृपापारतन्त्र्येण धृत्वा ।
ज्ञानात्मात्मानमत्राप्रतिहतकरणं सांख्यतत्त्वामृतानि
शिष्यान् स्वान् पाययित्वाऽकृत विशदमतीन् यस्तमीडे महर्षिम् ॥ १॥

पुरा किल कृत्स्नं जगन्नितान्ताज्ञानध्वान्तोपहतान्तःकरणं समीक्षमाणेन श्रीमहर्षिकपिलेना(१)ध्यात्मविद्याविभावसुं प्रकटयितुमी-

(१) महर्षिः कपिलो ब्रह्मपुत्र आसीत्, "सनकश्च सनन्दश्च तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥ सप्तैते ब्रह्मणः पुत्रा" इति । तथा "शुक्लकृष्णगतिर्देवो यो बिभर्ति हुताशनम् । अकल्मषः कल्मषाणां कर्ता क्रोधाश्रितस्तु सः ॥ कपिलं परमर्षिं च यं प्राहुर्यतयः सदा । अग्निः स कपिलो नाम सांख्ययोगप्रवर्तकः" ॥ इति महाभारतोक्तेरग्नेरवतार इति सूचितम् । कर्दमऋषेः पुत्रो देवहूत्यां जात इति भागवते । सांख्यप्रवचनभाष्यप्रारम्भे तु नारायणावतार इत्यभ्यधायि, "नारायणः कपिलमूर्तिरशेषदुःखहानाय जीवनिवहस्य नमोऽस्तु तस्मै" इत्युक्तेः । "अथात्रानादिक्लेशकर्मवासनासमुद्रपतितानानाथदीनानुद्दिधीर्षुः परमकृपालुः स्वतः सिद्धज्ञानो महर्षिर्भगवान् कपिलो द्वाविंशतिसूत्राण्युपादिक्षत्, सूचनात् सूत्रमिति हि व्युत्पत्तिः, तत एतैः समस्ततत्त्वानां सकलषष्टितन्त्रार्थानां सूचनं भवति, इतश्चेदं सकलसांख्यतीर्थमूलभूतम्, तीर्थान्तराणि चैतत्प्रपञ्चभूतान्येव, सूत्रषडध्यायी तु वैश्वानरावतारभगवत्कपिलप्रणीता, इयं तु द्वाविंशतिसूत्री तस्या अपि बीजभूता नारायणावतारमहर्षिभगवत्कपिलप्रणीतेति वृद्धाः," इति सर्वोपकारिण्यां सांख्यसंक्षिप्तसूत्रटीकायाम् । भाष्ये तु नारायणावतारभगवत्कापिलेन संक्षिप्तसूत्राणि द्वाविंशतिसंख्यानि प्रथमं निर्मितानि तत्त्वसमासाख्यानि, अनन्तरं सांख्यप्रवचनसंज्ञानि षडध्यायीरूपाणि सूत्राणि तेनैव भगवता निर्मितानि, तथा च भाष्यम्, "ननु तत्त्वसमासाख्यसूत्रैः सहास्याः षडध्याय्याः पौनरुक्त्यमिति चेन्न, संक्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्यात्, तत्त्वसमासाख्यं हि यत् संक्षिप्तं सांख्यदर्शनं तस्यैव प्रकर्षेणास्यां निर्वचनमिति, अत एवास्याः षडध्याय्याः सांख्यप्रवचनसंज्ञा सान्वये"त्यादि ।

हमानेनातिगूढाशयसंक्षिप्तसांख्यसूत्राणि विधायाप्यल्पयता सुगमपरिपाटीं लोकोपकृत्यै समवलम्बमानेन तेन भगवता षडध्यायी सूत्रिता, अथापि चातिसंक्षिप्तातिदुरूहाशयकपदानि सामान्यजनोपकाराक्षमाणि सूत्राणि पश्यद्भिः सुकुमारमतिभिर्बालैः शास्त्रतत्त्वं याथार्थ्येन कदाचिन्न परिचीयेतेति तेषु विपुलदयामादधानः सम्यग्विदितमहर्षिकपिलाशय ईश्वरकृष्णाभिधानो महामनाः कपिलसूत्राणां कृत्स्नं सारभूतमर्थं सांख्यकारिकानामनिबन्धं विरचय्य तत्र प्रदर्शयामास, यद्यपि च निबन्धोऽयं सांख्यकारिकानामको वाचस्पतिमिश्रादिकृतव्याख्यया न दुरवधाराभिप्रायको नापि चाध्ययनाध्यापनयोर्लुप्तप्रचारः प्रत्युत सश्लाघमध्येतुमध्यापयितुं चाद्रियत एव तथापि सांख्यचन्द्रिकानामकसांख्यकारिकाव्याख्यां नूतनां किंचित् सुगमां पर्यालोच्य गौडपादाचार्य(१) कृतसांख्यकारिकाभाष्यमति-

(१) गौडपादाचार्यश्च शंकराचार्यस्य परमगुरुरासीत्, तथा च गोस्वामिमण्डले सायंकाले पुष्पाञ्जलिप्रदानपूर्वकप्रणामाञ्जलिकरणसमयपठ्यमानमभियुक्तपद्यम्, "नारायणं पद्मभुवं वशिष्ठं शक्तिं च तत्पुत्रपराशरं च। व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्॥ श्रीशंकराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्। तं तोटकं वार्तिककारमन्यानस्मद्गुरून् संततमानतोऽस्मि"॥ इति। एवमुदन्तः श्रुतिसमवचनाद्वृद्धजाताच्छ्रूयते, कदाचित् स्वामिशंकराचार्यो माण्डूक्योपनिषदर्थं पिप्रच्छिषुर्गौडपादाचार्यमुपससाद, तत्समये च गौडपादाचार्यो हिमालयस्य गुहामध्यवात्सीत्, यदा तत्र शंकराचार्यो गत्वा माण्डूक्योपनिषदर्थमप्राक्षीत्, तदा गौडपादाचार्यः शंकरस्वामिनो योग्यतामवगन्तुकामो विष्णुसहस्रनामपुस्तकं तस्मै प्रदायाचकथत्, एतद्व्याख्यां श्रीमान् विधाय मह्यं प्रदर्शयतु ततोऽहं माण्डूक्योपनिषदर्थं ते वदिष्यामीति, ततः शंकराचार्यो विष्णुसहस्रनामभाष्यं रचयित्वा पुनस्तमुपगम्यैतद्भाष्यमदर्शयत्, ततश्च तेनातिप्रसन्नेन माण्डूक्योपनिषद्व्याख्यास्वरूपा स्वोपनिबद्धा कारिका शंकरस्वामिने ददे, ऊचे च शंकराचार्यः, यदनयैव कारिकया माण्डूक्योपनिषदर्थः सम्यक् ते स्फुरिष्यतीति।

"श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान् माण्डूक्योपनिषदर्थाविष्करणपरानपि श्लोकानाचार्यप्रणीतान् व्याचिख्यासुर्भगवान् भाष्यकार" इति माण्डूक्योपनिषद्भाष्यटीकायामानन्दगिरिश्च।



प्राचीनतयात्यादरणीयं चावबुध्य वाराणसेयसंस्कृतपदवीपरीक्षायां परीक्षणीयनिबन्धेष्वेनयोरपि संनिवेशिततास्तीति च विचार्य श्रीमत्प्रभुमहाशयवरविद्वद्वर्यथीबोसाहिबसंमतिं चावाप्य तत्पुस्तकसौलभ्यं संपिपादयिषुरहं काशिकसंस्कृतसीरीज्नामकपुस्तकश्रेण्यां निबन्धद्वयमिदममुमुद्रम्, विलोक्य चैनद् ग्रन्थद्वयं सारासारविचारविशारदा विद्वांसः स्वयमेवैतद्गुणागुणावकलनं मुद्रणं विहितवतो मम परिश्रमसफलतां च संविधास्यन्तीति शिवम्।

यथार्थं तु स वेद वेदवचनैर्योऽहर्निशं गीयते
किं ब्रूमो वयमस्य यस्य महिमा पारे गिरां राजते।
सत्यासत्यविचारणासु निपुणश्चक्षुःसहस्रं दधत्
सर्वं वस्तुचयं करामलकवद्यः सर्वशो वीक्षते ॥ १ ॥
प्रथममुद्रणमेतदभूदतो बुधजनः क्षमतामविशोधनम्।
यदिह पुस्तकमेकमलभ्यसत् तदपि भाष्यमिदं न परं शुभम् ॥२॥

गौडपादाचार्यकृतान्यन्यान्यपि ब्रह्मसूत्रभाष्यादीनि पुस्तकान्युपलभ्यन्त इत्यादि किंवदन्ती वरीवर्तीति।

पं० बेचनरामत्रिपाठी।

# सांख्यकारिका।

## नारायणकृतचन्द्रिकया सहिता।

श्रीगणेशाय नमः।

दुःख (१) त्रयाभिघाता-
ज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चे-
न्नैकान्तात्यन्ततोऽभावात्॥ १॥

श्रीरामगोविन्दसुतीर्थपाद-
कृपाविशेषादुपलभ्य बोधम्।
श्रीवासुदेवादधिगत्य सर्व-
शास्त्राणि वक्तुं किमपि स्पृहा नः॥ १॥
प्रकृतिं पुरुषं चैव नत्वाचार्यान् गुरूंस्तथा।
नारायणः सांख्यमूले तनुते सांख्यचन्द्रिकाम्॥ २॥

तदिदं शास्त्रं चतुर्व्यूहम्। हेयं हेयसाधनं हानं हानसाधनं चेति मुमुक्षुजिज्ञासितत्वात्। तत्र हेयं सर्वप्रतिकूलवेदनीयतया दुःखम्, हेयहेतुः प्रकृतिपुरुषयोरविवेकः, हानं दुःखस्यात्यन्तनिवृत्तिः परमपुमर्थः, हानहेतुः प्रकृतिपुरुषविवेकद्वारा शास्त्रम्, अतोऽत्र परमपुमर्थस्य स्वत एवेष्टत्वेन तदुपाये शास्त्रे प्रेक्षावतामिष्टसाधनताज्ञानादवश्यं जिज्ञासा भवतीत्याह दुःखत्रयेत्यादि, दुःखत्रयमाध्यात्मिकमाधिभौतिकमाधिदैविकं च, तत्रात्मानं शरीरमन्तःकर-

(१) यद्यपि दुःखममङ्गलं तथापि तत्परिहारार्थत्वेन तदपघातो मङ्गलमेवेति दुःखशब्दोपादानं मन्वादौ न दोषायेति मूलकाराशयः।

णं चाधिकृत्य यज्जायते तदाध्यात्मिकं दुःखं वातपित्तादि (१) प्रकोपजन्यं कामा (२) दिजन्यं च, तत्र भूतानि प्राणिनोऽधिकृत्य यज्जायते तदाधिभौतिकं व्याघ्रचौराद्युत्थम्, एवं देवाग्न्यादीनधिकृत्य यज्जायते तदाधिदैविकं दाहशीतादिकृतं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनं च, यद्यपि सर्वमेव दुःखं मानसमेव तथापि मनोमात्रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्वविभागः, तस्य दुःखत्रयस्याभिघातात्० असह्यसम्बन्धात् तदपघातके प्रकृतिपुरुषविवेकद्वारा दुःखोच्छेदके हेतौ वक्ष्यमाणशास्त्रे प्रेक्षावतां जिज्ञासा भवत्येवेत्यर्थः ।

यद्यपि वर्तमानं स्थूलं दुःखं द्वितीयक्षणे स्वयमेव नङ्क्ष्यति, अतीतं तु नष्टमेव, तथाप्यनागतसूक्ष्मदुःखनिवृत्तौ तात्पर्यम् । अत्र यद्यपि सत्कार्यवादे न ध्वंसप्रागभावरूपाभावस्तथापि निवृत्तिरत्र सूक्ष्मरूपस्यातीतावस्थत्वमेव (३) स्थूलस्वरूपाप्राप्तियोग्यत्वं वा । न चानागते मानाभावः, यावच्चित्तकालावस्थायिकार्यजननशक्त्या यावच्चित्तसत्त्वमनागतदुःखानुमानात् (४)।

ननु तत्र शारीरदुःखस्य रसायनादिसेवनात्, मानसस्य मनोज्ञस्त्रीपानभोजनादितः, आधिभौतिकस्य नीतिशास्त्राभ्यासनिरत्ययस्थानसेवनादितः, आधिदैविकस्य मणिमन्त्रौषधादितो दृष्टोपायादेवोच्छेदो भविष्यतीत्याशयेनाशङ्कते दृष्टे सेति । दृष्टे प्रसिद्धौषधादिविषय एव जिज्ञासा० अपार्था, अन्यथा सिद्धा(५)स्त्विति चे-

(१) आदिना श्लेष्मग्रहणं तेषां प्रकोपो वैषम्यं तेन जन्यमेतच्च शारीरम् ।

(२) आदिना क्रोधलोभमोहभयेर्ष्याविषादविषयादर्शनानां ग्रहणं तैर्जन्यम् ।

(३) नन्वतीतावस्थस्यापि कदाचित् प्रादुर्भावः स्यादित्याशङ्क्य पक्षान्तरमाह ।

(४) चित्तसत्त्वमनागतदुःखजनकं भवितुमर्हति यावच्चित्तावस्थायिकार्यजननशक्तिमत्त्वात् वह्निवत्, अग्रे दुःखं भविष्यति जनकादृष्टवत्त्वात् पूर्वादृष्टवदिति वा ।

(५) अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥



दित्यर्थः । निषेधति नेति । एकान्तत्वं दुःखोच्छेदस्यावश्यकत्वम् । अत्यन्तत्वं दुःखस्य पुनरनुत्पादस्तदुभयस्य दृष्टोपायादभावात् ॥ १ ॥

---

दृष्टवदानुश्रविकः
स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान्
व्यक्ताव्यक्तज्ञविज्ञानात् ॥ २ ॥

ननु स्वर्गस्य दुःखासम्भिन्नत्वा(१)दग्रस्तत्वाच्च तद्धेतुज्योतिष्टोमादिक एव जिज्ञासा भविष्यति तत्राह दृष्टवदिति । गुरुमुखादनुश्रूयते इत्यनुश्रवो वेदः कर्मकाण्डरूपस्तेन प्रोक्तो ज्योतिष्टोमादिरानुश्रविक उपायो दृष्टवत्० औषधादिवत् । अत्र हेतुमाह स हीति । हि यतः । अविशुद्धिरङ्गवैगुण्यं न हिंस्यादिति शास्त्रनिषिद्धहिंसा च । अन्ततो वृक्षपक्षादिच्छेदानामग्निसान्निध्यात् क्षुद्रजन्तुनाशादेश्च सम्भवात् । अतो दुःखहेतुरेव । क्षयेति तत्कर्मणः फलस्य क्षयित्वेन नात्यन्तदुःखोच्छेदकत्वम् । क्षयानन्तरं दुःखोत्पत्तेरित्यर्थः । अतिशयेति तत्राप्यधिकसुखिदर्शनात् । ईर्ष्यामर्षाभ्यां स्वीयो दुःखोत्कर्ष एवातिशय इत्यर्थः । ननु (२) विधिसंस्पृष्टस्य निषेधविषयतया विरुद्धत्वात्, अन्यथा विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषप्रसङ्गादाहवनीयविधिः (३) पदमहोममिव "न हिंस्या" दित्यादिनिषेधो "ऽग्नीषोमीयं पशुमालभेते" त्यादिविधिविषयां यागीयहिंसां परिहृत्य प्रवर्त्तत इति यागीयातिरिक्तहिंसैव पापं न यागीयेति

(१) यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम् ॥ इत्यादिप्रमाणात् ।

(२) मीमांसकप्रश्नः ।

(३) आहवनीये जुहोतीति ।

चेन्न। हिंसायां विध्यधीनेष्टसाधनत्वस्य निषेधाधीनानिष्टसाधनत्वस्य च समावेशसम्भवात् पशुवधप्रयुक्तस्याल्पानिष्टस्य वित्तव्ययायासादिसाध्यदुःखस्येवाभ्युपगमेन क्रतुसाध्यमहाफलार्थितया प्रवृत्तेरुपपन्नत्वेन विधिनिषेधाधीनप्रवृत्तिनिवृत्तिसमावेशदोषाणामनवकाशात्। पापमेव हिंसिधातुपदवाच्या यागीयापि हिंसेति तद्घटितज्योतिष्टोमादिकमविशुद्धमेव। अत एवोक्तं भारते पितापुत्रसंवादे "तातैतद्बहुशोऽभ्यस्तं जन्मजन्मान्तरेष्वपि। त्रयीधर्ममधर्माढ्यं न सम्यक् प्रतिभाति मे"॥ इति। अधिकमस्मत्कृतयोगसूत्रव्याख्याने ऽनुसंधेयम्। तद्विपरीतः श्रेयान्, दृष्टानुश्रविकाद्भिन्न उपायः शास्त्रैकगम्यात्मसाक्षात्कारः श्रेयान्, ऐकान्तात्यन्तिकदुःखोच्छेदक्षमः। स कस्माद्भवति तदाह व्यक्ताव्यक्तज्ञविज्ञानादिति। व्यक्तं भूतादि, अव्यक्तं प्रधानम्, ज्ञः पुरुषः; एषां विविच्य ज्ञानाद्भवतीत्यर्थः। अयमभिप्रायः। आत्मानात्मविवेकसाक्षात्कारात् कर्तृत्वाद्यखिलाभिमाननिवृत्त्या तत्कार्यरागद्वेषधर्माधर्माद्यनुत्पादात् पूर्वोत्पन्नकर्मणां(१) चाविद्यारागादिसहकार्युच्छेदरूपदाहेन विपाकानारम्भकत्वात् प्रारब्धसमाप्त्यनन्तरं पुनर्जन्माभावेन त्रिविधदुःखात्यन्तनिवृत्तिरूपो मोक्षो भवतीति तादृशसाक्षात्कारहेतौ मननाख्यविचाररूपे शास्त्रे प्रेक्षावतां जिज्ञासा भवत्येवेति॥ २॥

---

मूलप्रकृतिरविकृति-
र्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो
न प्रकृतिर्न विकृतिः पुरुषः॥ ३॥

व्यक्ताव्यक्तज्ञानां स्वरूपं दर्शयितुं लक्षणमाह मूलप्रकृतिरिति।

(१) संचितकर्मणाम्।



मूलप्रकृतिः सर्वजनिका प्रकृतिरजन्या तथा चाजन्यत्वे सति जनकत्वं प्रकृतित्वम्। अव्यक्तमुक्त्वा व्यक्तं द्विविधमाह महदाद्या इति। महत्तत्त्वाहङ्कारपञ्चतन्मात्राणि प्रकृतिविकृतयः। तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे सति जन्या इत्यर्थः। षोडशक इति। एकादशेन्द्रियाणि पञ्चाकाशादीनि महाभूतानि च विकार इति। तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्य इत्यर्थः। पुरुषस्तु सर्वभोक्ता न प्रकृतिर्न विकृतिः। अजनकत्वे सत्यजन्य इत्यर्थः। आद्यविशेषणेन प्रकृतिनिरासः। द्वितीयेनातीन्द्रिय(१)सामान्यादिनिरासः। तदेवं पञ्चविंशतितत्त्वान्युक्तानि। सेश्वरसांख्यनये तु पुरुषपदेनैवेश्वरस्यापि ग्रहणं मायापदेन चेश्वरसङ्कल्प एवोच्यते जीवादृष्टं वा० अविद्याशब्देन च जीवभ्रम एवोच्यते नान्यत्। अतो न तदकथनकृता न्यूनतेति सङ्क्षेपः॥ ३॥

---

दृष्टमनुमानमाप्तव-
चनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं
प्रमेयसिद्धिः प्रमाणाद्धि॥ ४॥

तत्त्वान्युक्तानि तेषां सिद्धिः प्रमाणेन भवति न चैकप्रमाणेन सर्वेषां तत्त्वानां सिद्धिः सम्भवति तथा च प्रमाणबहुत्वमुचितं तत्र कानि प्रमाणानि कियन्ति चेत्यत आह दृष्टमिति। दृष्टं प्रत्यक्षम्। अनुमानमनुमितिकरणं लिङ्गपरामर्शः। आप्तवचनं शब्दप्रमाणम्। उक्तं कपिलेन भगवतेत्यर्थः। कुतः सर्वप्रमाणसिद्धत्वात्। सर्वैः प्र-

(१) अतीन्द्रियं महत्तत्त्वादि तन्निष्ठसामान्यस्य जन्यत्वमेव। महत्तत्त्वस्य यथा जन्यत्वं तथा तस्यापि सांख्यमते जन्यत्वमेव। नैयायिकमते यथा जातिर्नित्या तथा सांख्यमते न किंतु द्विविधाः पदार्थाः सामान्या विशेषाश्च यथा मृत्तिका सामान्या घटश्च विशेषः॥

माणैः प्रमातृभिः पतञ्जलिप्रभृतिभिः सिद्धत्वात् प्रत्यक्षानुमानागमाः प्रमाणानीति स्वीकृतत्वात्। उपमानादिकं तु न सर्वप्रमाणसिद्धमिति भावः। यद्यपि वैशेषिकैः शब्दो नाभ्युपेयते तथापि ते न प्रमातार इति भावः। एवमन्येऽपि प्रत्यक्षाद्यपलपन्तो न प्रमातार इति बोध्यम्। उपमानस्यान्तर्भावो यथा गवयपदं गवयवाचकम्, असति वृत्त्यन्तरे तत्र प्रयुज्यमानत्वादिति। एवमर्थापत्तेरपि। यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रायं रात्रिभोजी दिवाऽभुञ्जानत्वे सति पीनत्वादिति (१)। अनुपलब्धिस्तु प्रत्यक्षसहकारिणी न स्वतो मानम्। ऐतिह्यसम्भवावपि (२) शब्द एव (३)। चेष्टात्व (४) नुमान एवेति सङ्क्षेपः। प्रमेयेति। हि यतः प्रमाणादेव प्रमेयाणां सिद्धिरतः प्रमाणं त्रिविधमिष्टमित्यर्थः ॥ ४ ॥

---

प्रतिविषयाध्यवसायो
दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वक-
माप्तश्रुतिराप्तवचनं तु ॥ ५ ॥

प्रमाणानां लक्षणान्याह प्रतिविषयेति। प्रतिविषयो नियतविषयो ऽध्यवसीयते निश्चीयते ऽनेनेति प्रतिविषयाध्यवसाय इन्द्रियम्। चक्षुरादीनां रूपादिविषयकत्वनियमान्नियतविषयकत्वम्। ननु कारणेन मेघादिना कार्यस्य वृष्ट्यादेर्ज्ञानं कार्येण धूमादिना कारणस्य

(१) यः दिवा अभुञ्जानत्वे सति रात्रिभोजी न भवति नासौ पीनो यथा उपवासी।

(२) यच्चादृष्टप्रवक्तृकं प्रवादमात्रमितिहोचुर्वृद्धा इत्यैतिह्यं यथेह वटे यक्षः प्रतिवसतीति। सम्भवस्तु यथा खार्यां द्रोणाढकप्रस्थाद्यवगमः।

(३) अन्तर्भवत इति शेषः।

(४) हिताहितप्राप्तिपरिहारार्था क्रिया चेष्टा।



वह्न्यादेर्ज्ञानं न प्रत्यक्षम्, तथा च ते (१) केन प्रमाणेन जनयितव्ये तत्राह त्रिविधमिति। तथा चानुमान एव तयोः प्रवेशः। तथा च गौतमसूत्रम्। "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं चे"ति। तत्पूर्वकं व्याप्त्यादिप्रत्यक्षपूर्वकम्। पूर्ववत् कारणेन कार्यानुमानम्। शेषवत् कार्येण कारणानुमानम्। सामान्यतो दृष्टं कार्यकारणान्यलिङ्गकम्, यथा वायूपनीतचम्पकभागो रूपादिमान् गन्धादिति। त्रितयसाधारणमनुमानलक्षणमाह तल्लिङ्गेति, तस्य साध्यस्य लिङ्गं (२) व्याप्यम्, लिङ्गं यत्र विद्यते स लिङ्गी व्याप्यवान् पक्षः, पूर्वं कारणं यस्य प्रत्यक्षस्य तत् तथा, तथा च साध्यव्याप्यविशिष्ट (३) पक्षप्रत्यक्षं वह्निव्याप्यधूमवान् पर्वत इत्याद्याकारः परामर्शो ऽनुमानम्। अनुमितिकरणत्वादित्यर्थः। शब्दलक्षणं वक्तुमाह आप्तवचनमिति, आप्तं च तद्वचनं चेत्याप्तवचनम्, आकाङ्क्षाऽऽसत्तियोग्यतातात्पर्यवत् पदकदम्बकम्, लक्ष्यनिर्देशो ऽयम्, आप्तश्रुतिरिति लक्षणम्, प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः, श्रूयत इति श्रुतिर्वाक्यम्, तथा चाप्तोक्तवाक्यत्वमिति लक्षणं प्राप्तम्, शुकबालकादियथार्थवाक्ये तु सेश्वरसांख्यमते ईश्वर एवाप्तः, अन्यमते तु तन्न प्रमाणमिति संक्षेपः। वस्तुतस्तु तन्मते (४) इन्द्रियादिकं न प्रमाणं किं त्विन्द्रियादिजन्या वृत्तिरेव, तथाहि अविसंवादिज्ञान (५)मनधिगततत्त्वबोधो वा प्रमा तत्करणं तस्या अयोगव्यवच्छेदेन (६)संबन्धि तदेव प्रमाणसामान्यलक्षणम्। तत्रेन्द्रियसं-

(१) ज्ञाने।

(२) यथा वह्न्यादेर्धूमादि।

(३) साध्यव्याप्याभ्यां विशिष्टम्।

(४) निरीश्वरसांख्यमते।

(५) यथार्थज्ञानम्।

(६) अवश्यसम्बन्धेन।

चारमार्गेण बाह्यवस्तुसंबन्धाच्चित्तस्येन्द्रियसंनिकृष्टार्थविशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं यथा घटोऽयमित्यादि । गृहीतव्याप्तिकेन हेतुना साध्यवति पक्षे ज्ञायमानेन साध्यविषया वृत्तिरनुमानं यथा पर्वतो वह्निमानित्यादि । आप्तोक्तेन शब्देन श्रोतुस्तत्तदर्थाकारा वृत्तिरागमः, यथा "स्वर्गकामो यजेतेति" वाक्यात् स्वर्गकामनावता यागः कार्य इति । अत्र सर्वत्र पौरुषो बोधः फलं येन जानामीत्यादि व्यहरति जन इत्यास्तां विस्तरः । कारिकार्थस्तु प्रतिविषयोऽध्यवसीयते निश्चीयते विषयीक्रियते ऽनेनेतीन्द्रियजन्यवृत्तिरूपं ज्ञानं प्रत्यक्षम् । लिङ्गलिङ्गिपूर्वकं स्व(१)ज्ञानद्वारा हेतुपक्षजन्यसाध्यज्ञानमनुमानम् । आप्तश्रुतिः, आप्तशब्देन शाब्दो बोध इति ॥ ५ ॥

---

सामान्यतस्तु दृष्टा-
दतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं
परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥

इदानीं प्रमाणत्रयविषयानाह सामान्यतस्त्विति, सामान्यत इति षष्ठ्यन्तात् तसिः, तथा चेन्द्रिययोग्यस्य सर्वस्याऽपेक्षितस्याऽनपेक्षितस्य च दृष्टात् प्रत्यक्षादेव सिद्धिः, तेन पृथिव्यादीनां प्रत्यक्षादेव सिद्धिरिति भावः । अतीन्द्रियाणां प्रकृत्यादीनां सिद्धिरनुमानात्, यथा महत् तत्त्वं सकारणकं कार्यत्वाद् घटवदिति, कारणान्तरबाधात् प्रकृतिसिद्धिः, न च पुरुष एव जनको ऽस्तु तस्यापरिणामित्वेनाजनकत्वात् । तस्मादपि(२) परोक्षमतीन्द्रियं यागस्वर्गसाधनत्वादि, आप्तागमात्, शब्दप्रमाणादित्यर्थः ॥ ६ ॥

(१) व्याप्तिः स्वशब्दार्थः ।
(२) अनुमानादपि ।



अतिदूरात् सामीप्या-
दिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद्व्यवधाना-
दभिभवात् समानाभिहाराच्च ॥ ७ ॥

ननु प्रकृत्यादौ प्रत्यक्षमेव कथं न प्रवर्तत इत्याकाङ्क्षायां प्रत्यक्षविघटकान् (१) हेतूनाह, अतिदूरादिति, प्रत्यक्षं न प्रवर्तत इति शेषः, अत्यूर्ध्वगतः पक्षी न दृश्यते दूरत्वदोषात्, दोषश्च क्वचित् कश्चिदेव० अन्यथा सूर्यादिमण्डलदर्शनं न स्यादिति । चक्षुर्गोलगतः कर्पूरादिरतिसामीप्यान्न गृह्यते, अत्राप्यतिपदस्यान्वयः । इन्द्रियं गोलकं तस्य घातान्नाशात् । मनोऽनवस्थानात्, व्यासङ्गेन (२) तदिन्द्रियसंयोगाभावात् (३) । सौक्ष्म्यादिन्द्रियायोग्यत्वात् । व्यवधानात् कुड्यादेः । अभिभवो बलवत्सजातीयसंबन्धो यथा सौरालोकाभिभवाच्चन्द्रप्रभा न गृह्यते । समानाभिहारः समगुणानां मिश्रणं यथा माहिषादिदुग्धे पतितं गव्यदुग्धं न गृह्यते ॥ ७ ॥

---

सौक्ष्म्यात् तदनुपलब्धि-
र्नाभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं
प्रकृतिसरूपं विरूपं च ॥ ८ ॥

नन्वेषामन्यतराधीनः प्रत्यक्षाभाव इति भवदीयं मतं तन्न युक्तं प्रकृत्यादीनामभावनिबन्धन एव स भविष्यतीत्यत्राह सौक्ष्म्यादिति । सौक्ष्म्यान्निरवयवद्रव्यत्वेनेन्द्रियायोग्यत्वात् तेषां प्रकृत्यादीना-

(१) प्रत्यक्षप्रवृत्तिप्रतिबन्धकान् ।
(२) मनसोऽन्येन्द्रियसंयोगेन ।
(३) तेन प्रत्यक्षजनकेन्द्रियेण सह संयोगाभावात् ।

मनुपलम्भो न प्रकृत्याद्यभावात्, कुतः, कार्यतस्तदुपलब्धेः कार्येण तेषां सिद्धेः, कार्यलिङ्गकतदनुमानस्याबाधितत्वादिति भावः । किं कार्यं तत्राह महदादीति, आदिपदादहंकारपञ्चतन्मात्राणि गगनादयश्च । तत्र सरूपं महत्तत्त्वादिसप्तकं तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वात् (१) । विरूपं गगनादि तादृशाजनकत्वात् (२) । एतत्कथनं कार्याणां विवेकज्ञानाय, सारासारविवेकेनात्मतत्त्वज्ञानजिज्ञासाद्वारा साधर्म्यवैधर्म्यप्रकारककार्यतत्त्वज्ञानस्य कैवल्योपयोगित्वादित्यग्रे स्फुटीभविष्यति ॥ ८ ॥

---

**असदकरणादुपादा-**
**नग्रहणात् सर्वसंभवाभावात् ।**
**शक्तस्य शक्यकरणात्**
**कारणभावाच्च सत् कार्यम् ॥ ९ ॥**

ननु तार्किकनये (३) सतोऽसज्जायते तथा च यावत् कार्यं न जातं तावत्पर्यन्तं कारणस्य प्रमाणाभावेनाऽसत्त्वापत्तिः, तथा च कथं पश्चादपि तस्य (४) सत्त्वं स्यात्, नहि कार्येणासतः सत्त्वं कर्तुं शक्यते, तत्राह, असदिति । कार्यं कारणव्यापारात् प्रागपि सदेव न तु तदानीमसत्, अत्र हेतुमाह, असदकरणात् (५), असतो नृशृङ्गतुल्यस्य प्रागविद्यमानस्योत्पादनासंभवात्, अन्यथा नृशृङ्गस्या-

(१) तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वं यथा प्रकृतौ वर्तते तथा तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वं महत्तत्त्वादिषु सप्तसु ।

(२) तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वात् ।

(३) सतः कारणात् परमाण्वादेरसत् कार्यं द्व्यणुकादि जायत इत्यर्थः ।

(४) कारणस्य ।

(५) विमतं कार्यं कारणव्यापारात् प्रागपि सद् भवितुमर्हति० उत्पाद्यमानत्वाद् यदेवं तदेवं यथा तिलेषु तैलम्, न यदेवं न तदेवं यथा नरविषाणमिति ।



पि करणापत्तेः (१), असत्त्वाविशेषात् । हेत्वन्तरमाह० उपादानग्रहणात्, उपादानं समवायि कारणं तस्य कार्यार्थिना ग्रहणात्, यथा दध्यर्थी० क्षीरमुपादत्ते नान्यत्, यदि चासत् कार्यं स्यात् तर्हि दध्यर्थी० उदकस्योपादानं कुर्यात्, न च कुरुते, तस्मादुपादानग्रहणादपि ज्ञायते कारणे कार्यमस्तीति । हेत्वन्तरमाह सर्वसंभवाभावात्, लोके यद्यस्मिन्नस्ति तदेव तस्माज्जायत इति वक्तुं शक्यं मृदादिभ्य एव घटादिदर्शनात्, यदि चासत् कार्यं स्यात् तदा तत् सर्वं सर्वत्र संभवेत्० असत्त्वाविशेषात्, न च यत्र यस्य प्रागभावोऽस्ति स एव तत्र जायत इति वाच्यम्, तन्त्वनुत्पाददशायां पटप्रागभावः कुत्र स्यात्, न च काल इति वाच्यम्, प्रागभावस्य क्रियाविरहेण तन्त्वावागमनविरहे तन्तुवृत्तित्वं न स्यात्, न (२) चाधिकरणतन्तुरूप एव प्रागभावः, तर्ह्यधिकरणत्वाविशेषत्वाद् घटादिप्रागभावरूपतापि (३) स्यात्, न च पटनिरूपितकारणत्वं नियामकम्, असतः पटादेर्निरूपकत्वादिधर्मासंभवात्, सदसतोरसंबन्धात् (४), निरूपकत्वादेर्निरूपकत्वस्वरूपत्वे तु तद्दोषतादवस्थ्यम्, कारणे कार्यासत्तायां त(५)न्निरूपितकारणता मृद्येव नान्यत्रेति नियामकाभावादित्याद्यन्यत्र विस्तरः । हेत्वन्तरमाह शक्तस्य शक्यकरणादिति, कार्यशक्तिमत्त्वमेवोपादानत्वम्, अन्यस्य (६) दुर्वचत्वात्, शक्तिश्च कार्यस्यानागतावस्थैव, अर्थान्तरत्वे तस्याः कार्यासंबद्धत्वे० अव्यवस्था(७), संबद्धत्वे नासता संबन्ध इति शक्तस्य शक्यकरणादपि स-

(१) उत्पादनापत्तेः ।

(२) अभावोऽधिकरणस्वरूप इति प्रभाकरमतं निराकरोति नेति ।

(३) नियामकाभावादित्यभिप्रायः ।

(४) तेजस्तिमिरयोरिव ।

(५) तत् कार्यम् ।

(६) शक्तिरहितस्य ।

(७) असंबद्धत्वाविशेषेण सर्वस्मात् सर्वं संभवेदित्यव्यवस्था, यथाहुः सांख्यवृद्धाः,

त् कार्यमित्यर्थः। हेत्वन्तरमाह कारणभावाच्चेति, "तद्धेदं तर्ह्यव्याकृतमासी" दित्यादिश्रुतेरुत्पत्तेः प्रागपि कार्यकारणाभेदश्रवणेन कार्यस्य कारणात्मकत्वादपि सत् कार्यम्, असत्त्वे हि सदसतोरभेदानुपपत्तेरित्यर्थः, अपिच लोके यदात्मकं कारणं तदात्मकं कार्यमिति दृष्टं यथा कोद्रवेभ्यः कोद्रवा व्रीहिभ्यो व्रीहयो जायन्ते, यदि चासत् कार्यं स्यात् तदा कोद्रवेभ्यो व्रीहीणां व्रीहिभ्यश्च कोद्रवाणामुत्पत्तिः स्यात्, न च दृश्यते, तस्मात् कार्यस्य कारणात्मकत्वादपि सत् कार्यमिति, न च तर्हि कार्यस्य नित्यत्वप्रसक्त्या सामग्रीवैयर्थ्यप्रसङ्ग इति वाच्यं सामग्र्या अभिव्यक्त्यर्थत्वात्, न चाभिव्यक्तेरपि जन्यत्वे सत्कार्यवादबाधः स्यात्, नित्यत्वे सदैवाभिव्यक्तिः स्यात्, तस्या अप्यभिव्यक्त्यपेक्षायामनवस्थापत्तिरिति वाच्यम्, व्यवहारोपयोगितत्तत्कार्याभिव्यक्तेस्तत्तत्कार्यनिष्ठसत्त्वगुणरूपतया नित्यत्वेऽपि तमसा प्रतिबद्धत्वान्न व्यवहारोपयोगित्वम्, अभिव्यञ्जकसामग्र्या तूत्तेजकेन मणे(१)रिव तमसः प्रतिबन्धाद्व्यवहाराक्षमत्वमिति, सामग्र्या उत्तेजकत्वमात्राङ्गीकारात् सत्कार्यवादबाधाभावात्, तस्मात् कार्यकारणयोरभेदेऽपि व्यवहारक्षमता कार्यात्मनाभिव्यक्तस्यैव नान्यथा, अतो न कोऽपि दोष इत्यास्तां विस्तरः ॥ ९ ॥

---

हेतुमदनित्यमव्यापि

---

असत्त्वान्नास्ति संबन्धः कारणैः सत्त्वसङ्गिभिः । असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ इति । अर्थान्तरस्य सत्त्वात् कार्यस्य घटादेरसत्त्वात् सदसतोरसंबन्धादव्यवस्थेति वा ।

(१) कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वं कार्यानुकूलधर्मविघटकत्वं वा, तथा च कारणीभूतो योऽभावो मण्यभावस्तस्य प्रतियोगी मणिस्तस्यैवाग्निनिष्ठदाहरूपकार्यस्य प्रतिबन्धकत्वमिति भावः, प्रतिबन्धकस्य प्रतिबन्धकत्वमुत्तेजकत्वम् ।



सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं
व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

तत्र पूर्वस्यामार्यायां महदादि कार्यं प्रकृतिविरूपं सरूपं चेत्युक्तम्, तदिदानीं विशिष्य ज्ञानाय दर्शयति हेतुमदिति । व्यक्तं महदादि पृथिव्यन्तं त्रयोविंशतिसंख्यं हेतुमत्, हेतुः कारणं यस्याविर्भावे तद्धेतुमत्, कदाचिदाविर्भावशीलम् । अनित्यं कदाचित् तिरोभावशीलम् । अव्यापि॰ असर्वगतं विभुत्वे क्रिया न स्यात् । सक्रियं प्रवेशादिक्रियावत्, बुद्ध्यादयो ह्येकं देहं त्यक्त्वा देहान्तरं प्रविशन्ति । अनेकं प्रतिपुरुषं भेदात् सजातीयभेदवत्, तत्त्वं (१)चात्र स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणतत्त्वविभाजकोपाधिमत्त्वम् (२), याति (३) चेदं महदादिषु महदादिप्रतियोगिकान्योन्याभावेन(४) महदन्तरादौ महत्त्वादेः समानाधिकरणत्वात्, प्रकृतौ तु न याति प्रकृत्यन्योन्याभावस्य प्रकृतावसत्त्वात्, पुरुषे सत्त्वेऽपि तत्र प्रकृतित्वाभावात्, पुरुषेऽतिव्याप्तिवारणाय तु त्रिगुणत्वे सतीति विशेषणीयम्, अथवानेकत्वं सर्गभेदेन भिन्नत्वम्, सर्गद्वयसाधारण्याभाववदिति यावत्, तेन नान्यत्रा(५)तिव्याप्तिः । आश्रितं वृत्तिमत्, (६) यथा महत्तत्त्वं प्रधाने॰ अहंकारो बुद्धौ पञ्च तन्मात्राण्यहंकारे भूतानि तन्मात्रेषु, एवं यथासंभवमूह्यम् । लिङ्गं लिङ्गयति ज्ञापयतीति लिङ्गमनुमापकम्, भवति हि कार्यमिदं का-

---

(१) सजातीयभेदवत्त्वम् ।

(२) स्वशब्देन महत्तत्त्वादिस्तस्याश्रयो महदादिः स प्रतियोगी यस्य तादृशो योऽन्योन्याभावस्तत्समानाधिकरणो यस्तत्त्वविभाजकोपाधिस्तादृशोपाधिमत्त्वम् ।

(३) समन्वेति लक्षणं घटत इत्यर्थः ।

(४) सह ।

(५) पुरुषादौ ।

(६) वृत्तितानियामकसंबन्धेन ।

रणस्याव्यक्तस्यानुमितिजनकं भोग्यत्वाद् भोक्तुः पुरुषस्य चानुमितिजनकम्। सावयवम्, अवयवैर्गुणैर्युक्तम्। परतन्त्रं साक्षात् परम्परया वा प्रकृत्यधीनस्वरूपपरिणामकं (१) भवति। एतद्वैधर्म्यं प्रकृतावाह विपरीतमिति, अव्यक्तं प्रकृतिः, विपरीतमहेतुमत् कारणत्वविश्रान्तेस्तत्रै (२) वाङ्गीकारात्। नित्यम्, अनुत्पत्तिधर्मकत्वात्। व्यापि सर्वगतत्वात्। निष्क्रियं शान्तादिक्रियाशून्यत्वात्। एकं सजातीयभेदशून्यम्। निराश्रितं कारणशून्यत्वात्। अलिङ्गं कारणानुमापकम्, तेनास्य पुरुषानुमापकत्वेऽपि न हानिः। निरवयवम्, अकारणकत्वात्। स्वतन्त्रं कार्ये स्वयं समर्थत्वात्। यद्यप्येते धर्माः पुरुषस्यापि तथापि गुणवत्त्वे सतीति विशेषणीयम्, तेन न तत्रातिव्याप्तिरिति संक्षेपः॥ १०॥

---

त्रिगुणमविवेकि विषयः
सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं
तद्विपरीतस्तथा च पुमान्॥ ११॥

एवं व्यक्ताव्यक्तयोर्वैरूप्यमुक्त्वा सारूप्यमाह त्रिगुणमिति। व्यक्तं महदादि तथा प्रधानं प्रकृतिः। त्रिगुणं सत्त्वरजस्तमांसि त्रयो गुणा यस्य तत् त्रिगुणं तत्र प्रकृतेर्गुणत्रयसाम्यावस्थारूपत्वात्, महदादेश्च प्रकृतिकार्यत्वेन गुणसंबन्धात्। अविवेकि प्रकृत्यभिन्नम्, तत्र महदादेः प्रकृत्यभिन्नत्वं कार्यकारणयोरभेदात्, प्रकृतेस्तु स्वत एव। विषयः ज्ञानभिन्नः, न तु योगाचारमतवज्ज्ञानाकारः, तथा सत्येकस्य बहुभोग्यता न स्यात्, ज्ञानस्य तत्तदीयस्य तत्तत्पुरुष-

(१) महदादीनां यत् स्वरूपं कार्यात्मना परिणामश्च तदुभयं प्रकृत्यधीनमित्यर्थः।
(२) अव्यक्त एव।



मात्रवेद्यत्वात्। सामान्यं गुणवत्त्वेन तुल्यम्, अथवा भोग्यत्वेन सर्वपुरुषाणां पण्यस्त्रीवत् तुल्यम्। अचेतनं स्वप्रकाशचेतनाद्भिन्नम्, अनवभासकत्वात्। प्रसवधर्मि, प्रसवोऽन्याविर्भावहेतुत्वं धर्मो यस्य तादृशम्, यस्माद्बुद्ध्यादिकमहंकारादिकं प्रसूते प्रधानं तु बुद्धिं प्रसूते। तदिदं सर्वं व्यक्ताव्यक्तयोः सारूप्यमुक्तम्। अधुना व्यक्ताव्यक्तयोः पुरुषस्य च साधर्म्यं वैधर्म्यं चाह तद्विपरीतस्तथा च पुमानिति, ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतो विरूपः, निर्गुणत्वात्, निर्विषयत्वात्, निःसामान्यत्वात्, चेतनत्वात्, अप्रसवधर्मित्वाच्च, तथा चाव्यक्तसरूपोऽप्यहेतुमत्त्वादिना, एवं व्यक्तसरूपोऽप्यनेकत्वसंख्ययेति भावः॥ ११॥

---

प्रीत्यप्रीतिविषादा-
त्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रय-
जननमिथुनवृत्तयश्च गुणाः॥ १२॥

त्रिगुणमित्युक्तं तत्र किमात्मका गुणाः किमर्थाः किंप्रवृत्तयश्च तत्राह प्रीत्यप्रीतीति। गुणाः सत्त्वरजस्तमांसि यथासंख्यं प्रीत्यादिरूपाः, तत्र प्रीतिः सुखम्, उपलक्षणमार्जव(१)मार्दवह्रीश्रद्धाक्षमानुकम्पाज्ञानादीनाम्। अप्रीतिर्दुःखम्, उपलक्षणं प्रद्वेषद्रोहमत्सरनिन्दानिकृत्या(२)दीनाम्। विषादो मोहः, उपलक्षणं विप्रलम्भ(३)भयनास्तिक्यकौटिल्यकार्पण्याज्ञानादीनाम्। यत्रैतदुपलभ्यते तत्र तादृग्गुणः प्रत्येतव्य इति भावः। लक्षणमुक्त्वा प्रयोजनमाह प्रकाशेत्या-

(१) आर्जवं सरलता।
(२) निकृतिः पराभवः।
(३) विप्रलम्भो वञ्चनम्।

दि, प्रकाशोऽवभासः प्रवृत्तिश्चालनं नियमः प्रतिबन्धोऽर्थः प्रयोजनं येषां ते तादृशाः। तत्रावभासः सत्त्वेन, चालनं रजसा, प्रतिबन्धस्तमसा। तथाहि सत्त्वं रजसा चालितं कार्यं जनयेद् यद्यावरकेण तमसा न नियम्येत तथा च तमसा प्रतिबन्धात् तत् स्वार्थक्षमं न भवति, अतस्तत्प्रतिबन्धस्तस्य प्रयोजनं बोध्यम्। अन्योन्येति, अत्रान्योन्यपदं वृत्तिपदं च चतुर्ष्वप्यन्वेति। तथा चान्योन्याभिभववृत्तयः, तथाहि सत्त्वमुत्कटं भूत्वा रजस्तमसी अभिभूय शान्तां वृत्तिं लभते, एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढाम्। अन्योन्याश्रयवृत्तयः, अन्यतमो गुणः स्वकार्यार्थमन्यावाश्रित्य सहकारिणौ कृत्वा प्रवर्तते। अन्योन्यजननवृत्तयः, कार्यस्य त्रिगुणात्मकत्वादन्योन्यजनका इत्यर्थः। अन्योन्यमिथुनवृत्तयः, स्त्रीपुरुषवदन्योन्यसंयोगशीला इत्यर्थः। अत्रायं विशेषः, एको यदाधिकस्तदापरौ दुर्बलाविति, तथैव दर्शनात्॥ १२॥

---

सत्त्वं लघु प्रकाशक-
मिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव(१) तमः
प्रदीपवच्चार्थतो वृत्तिः (२)॥ १३॥

सत्त्वादीनामसाधारणं धर्मं विवेकोपयोगायाह सत्त्वं लघ्विति। लघु लघुत्ववत्, प्रकाशकमिन्द्रियार्थसंनिकर्षे सत्यर्थावभासकम्, सत्त्वाधिक्येनैवाङ्गानां लघुताया उपलब्धेरिन्द्रियाणां विषयग्रहणसामर्थ्यदर्शनाच्च, लघुत्वं प्रकाशकत्वं च सत्त्वस्य लक्षणम्, तत्र लघुत्वं कार्योद्गमनहेतुभूतो धर्मः, इष्टं संख्याचार्यैः। उपष्टम्भकं संश्लेषजनकम्, चलं सक्रियम्, रजसैव संश्लेषक्रिययोरुपलम्भात्, प्रेरकत्वं सक्रियत्वं च रजसो लक्षणमिति भावः। गुरु गुरुत्ववत्, वरणकमावरकम्, तमसैवाङ्गगुरुत्वविषयावभासप्रतिबन्धयोर्दर्शनात्, गुरुत्वं तत्तदिन्द्रियव्यापारनिवृत्तिद्वारा तत्तत्कार्यप्रतिबन्धकत्वं च तमोलक्षणमिति भावः। नन्वेतत्कथनेन सत्त्वरजस्तमांसि जात्यन्तराण्येवेति लभ्यन्ते तथा च तेषां परस्परविरुद्धानां कथमेकत्र प्रवृत्तिः संभवति परस्परविरुद्धानां शत्रूणामेकार्थकरणानुपलम्भात्, तत्राह प्रदीपवदिति, यथा तैलवर्तिदीपानां परस्परं विरोधेऽपि तैलवर्तिभ्यां सह दीपः प्रकाशं जनयति तद्वदित्यर्थः, दीपोपरि तैलपतनेन दीपनाशात् तैलमपि दीपविरोधि, एवं वर्तिरपि स्वल्पकेन दीपनाशिकेति॥ १३॥

---

अविवेक्यादिः (१) सिद्ध-
स्त्रैगुण्यात् तद्विपर्ययाभावात्।
कारणगुणात्मकत्वात्
कार्यस्याव्यक्तमपि सिद्धम्॥ १४॥

अविवेकित्वादिकं प्रकृत्यादिसाधर्म्यमुक्तं तत् कथं तेषु (२) सिद्धमित्यत आह अविवेक्यादिरिति। अत्राविवेक्यादिरिति धर्मपरः, अविवेकित्वादिकं प्राङ्निरुक्तं महदादिष्वबाधितम्, कुतः, त्रैगुण्यात्, प्रकृतिवत् त्रिगुणत्वात् (३)। व्यतिरेकसहकारेणैव येऽनुमानमिच्छन्ति तान् प्रत्याह तद्विपर्ययेति, तस्याविवेकित्वस्य विपर्ययो यत्र स तद्विपर्यय आत्मा तत्र त्रैगुण्याभावात्, तथा च यत्राविवेकित्वाभावस्तत्र

(१) एवकारो भिन्नक्रमः प्रत्येकं संबध्यते, सत्त्वमेव रज एव तम एवेति।

(२) पुरुषार्थत इति यावत्, तथा च वक्ष्यति पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणमिति।

(१) अविवेकित्वादिकम्।

(२) प्रकृत्यादिषु।

(३) तथा च प्रयोगः, इदं व्यक्तमविवेक्यादियोगि त्रिगुणात्मकत्वादव्यक्तवदिति।

त्रैगुण्याभावः ० आत्मवदिति व्यतिरेकव्याप्तिरस्त्येव । अतस्तत्सिद्धि-(१)रप्यबाधितैवेति भावः । ननु प्रकृत्यनन्यत्वं महदादीनामुक्तं प्रकृतिसिद्धिरेव तु कुतस्तत्राह कार्यस्येति, महत्तत्त्वादीनां कारणाभावे नित्यत्वापत्त्यात्मनोऽनिर्मोच एव स्यादिति जन्यत्वमेवावश्यकम्, जन्यं च तत्समानजातीयगुणककारणकमेव वाच्यं तथैवानुभवात्, कारणं च तन्नित्यमेव तस्यापि कारणस्वीकारेऽनवस्थापत्तिः स्यात्, अतोऽव्यक्तं प्रधानमपिना तत्त्रैगुण्यं च सिद्धमित्यर्थः ॥ १४ ॥

---

**भेदानां परिमाणात् (२)**
**समन्वयात् (३) शक्तितः प्रवृत्तेश्च ।**
**कारणकार्यविभागा-**
**दविभागाद्वैश्वरूप्यस्य ॥ १५ ॥**

महदादिभ्यो भेदेन प्रधानं हेतुभिः साधयति भेदानामिति । कारणमस्त्यव्यक्तमित्युत्तरेणान्वेति, भिद्यन्त इति भेदा महदादयस्तेषां परिमाणात् परिमितत्वादव्यापित्वात्, अनेकत्वरूपभेदवत्त्वाद्वा, यद् यदनेकमव्यापि च तत् तत् कार्यम्, भवति च महदादिकं प्रतिपुरुषनियतत्वादनेकमव्यापि च, अतस्तत्कारणं योग्यतया नित्यमेकं प्रधानमेवेति भावः । हेत्वन्तरमाह समन्वयात्, सुखदुःखमोहान्वि-

(१) महदादौ त्रैगुण्यस्य सिद्धिरित्यर्थः ।

(२) अत्रेदमनुमानं विवादाध्यासिता भेदा अव्यक्तकारणवन्तः परिमितत्वाद् घटादिवदिति, घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः, उक्तमेतद्यथा कार्यस्याव्यक्तावस्था कारणमेवेति, यन्महतः कारणं तत् परमाव्यक्तं ततः परतराव्यक्तकल्पनायां प्रमाणाभावात् ।

(३) इतश्च विवादाध्यासिता भेदा अव्यक्तकारणवन्तः समन्वयात्, भिन्नानां सरूपता समन्वयः, सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्यवसायादिलक्षणाः प्रतीयन्ते, यानि च यद्रूपं समनुगतानि तानि तत्स्वभावाव्यक्तकारणकानि, यथा मृद्धेमपिण्डं समनुगता घटमुकुटादयो मृद्धेमपिण्डाव्यक्तकारणका दृष्टा इति ।



तत्वरूपसमानधर्मवत्त्वादित्यर्थः, व्यावृत्तानामेषां (१) तत्समानस्वभावैककारणकत्वमावश्यकम्, तच्च कारणं योग्यतया प्रधानमेवेति भावः । इतश्चाऽस्ति प्रधानमित्याह शक्तितः प्रवृत्तेश्चेति, शक्तिमत्त्वादेव कार्यानुकूलप्रवृत्तिसंभवात् कारणानाम्, शक्तेश्च प्रकृतिरेवापूरिका, यतः कार्यं महद्भवति, यथा मृदापूराद् बीजं वृक्षादिरिति (२) भावः । इतश्चास्ति प्रधानमित्याह कारणकार्यविभागादिति, कारणे सतः कार्यस्यैव कूर्माङ्गानामिव निःसरणरूपपृथग्भावादिरूपविभागान्महदादिकार्यस्य तादृशतादृशावस्थाहेतुरव्यक्तमेवेति भावः । इतश्चास्ति प्रधानमविभागाद्वैश्वरूप्यस्य, अत्र स्वार्थे ष्यञ्, विश्वरूपस्य त्रिलोकस्याविभागात् (३), प्रलये कारणैकीभावरूपाल्लयादित्यर्थः, तादृशकारणं विना तेषां भिन्नानामेकीभावरूपो लय एव न स्यादिति भावः । न च ब्रह्मैव तादृशकारणमस्तु कृतं प्रधानेनेति वाच्यम्, तस्य (४) शक्तिमत्त्वेन कारणत्वकल्पनापेक्षया शक्तित्वेन प्रधानकल्पनाया एवोचितत्वादिति संक्षेपः ॥ १५ ॥

---

**कारणमस्त्यव्यक्तं**
**प्रवर्तते त्रिगुणतः समुदयाच्च ।**
**परिणामतः सलिलवत्**
**प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥**

ननु यद्येकं प्रधानं कथं तर्हि तस्माद्विविधकार्योत्पत्तिः, नह्येकन्तुतः पटो दृश्यते तत्राह कारणमिति । यदव्यक्तं जगतः कारणमस्ति तत् त्रिगुणतः प्रवर्तते सत्त्वादिगुणत्रयात् प्रवर्तते कार्यं जनय-

(१) परस्परं भिन्नानां महदादीनाम् ।

(२) बीजं वृक्षादिरूपेण परिणमत इत्यर्थः ।

(३) त्रिलोक्या इत्युचितम्, एवमन्यत्रापि ज्ञेयम् ।

(४) ब्रह्मणः ।

ति, तथा च गुणत्रयात्मके प्रधाने बहुत्वमस्त्येव, अतो नानुपपत्तिरिति भावः। एकजातीयजनकता कथं तत्राह समुदयाच्चेति (१), मेलनाच्चेत्यर्थः, गुणप्रधानभावेन (२) मिलित्वा चित्ररूपमिवैकं कार्यं जनयतीति भावः। भवतु महदादि कार्यमेकजातीयं कार्यान्तरेषु वैषम्यं तु कुतस्तत्राह प्रतिप्रतीति, एकैकगुणाश्रयेण यो विशेषस्तस्मादित्यर्थः, गुणवैषम्याद्वैषम्यमिति भावः। तत्र दृष्टान्तः परिणामतः सलिलवदिति, यथा सलिलमेकमपि नारिकेलजम्बीरादिपरिणामभेदान्मधुरतिक्तादिभावं प्रतिपद्यते तद्वदिदमपि सहकारिभेदादेव विषममिति भावः॥ १६॥

---

संघातपरार्थत्वात्
त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात्
कैवल्यार्थं प्रवृत्तेश्च॥ १७॥

प्रधाने प्रमाणमुक्त्वा पुरुषे प्रमाणमाह संघातेति। पञ्चम्यन्तपञ्चहेतूनां (३) पुरुषोऽस्तीत्यनेनान्वयः, संघातः पृथिव्यन्तसमूहस्तस्य शय्यादिवत् परार्थत्वात् परप्रयोजनार्थत्वात्, प्रयोजनं च सुखदुःखान्यतरसाक्षात्काररूपो भोगः, तस्य च जडे बाधाच्चेतनस्तद्वान् पुरुषोऽस्ति, युक्तिप्रमाणादिति भावः। हेत्वन्तरमाह त्रिगुणादिविपर्ययादिति, त्रयो गुणा यस्यादिरसौ त्रिगुणादिस्तस्य त्रिगुणादे (४) र्विपर्ययोऽभावस्तस्मात्, त्रिगुणतत्कार्यस्य जडत्वात् कार्यविशेषे (५) ऽकारणत्वाच्च किंचिन्निष्ठाभावप्रतियोगित्वं घटादेरिवावश्यकम्, सर्वस्य त्रिगुणस्याभावस्त्वत्रिगुणे पुरुष एव संभवति, अतस्त्रिगुणाभावाधिकरणत्वेन पुरुष आवश्यक इति भावः। हेत्वन्तरमाह० अधिष्ठानादिति, अधिष्ठातृत्वादित्यर्थः, यथा रथः सारथिनाधिष्ठितः प्रवर्तते तद्वदिदमपि सर्वं जडत्वात् पुरुषाधिष्ठितमेव प्रवर्तत इत्यकामेनाप्यवश्यं वाच्यम्, अतस्त्रिगुणाधिष्ठातृतया पुरुषोऽस्तीति भावः। हेत्वन्तरमाह भोक्तृभावादिति, साक्षित्वादित्यर्थः, यस्येदं व्यक्ताव्यक्तं सर्वं षड्रसादिवदनुभवनीयं स पुरुष आवश्यक इति भावः। हेत्वन्तरमाह कैवल्यार्थं प्रवृत्तेश्चेति, शिष्टा मुक्तौ प्रवर्तमाना दृश्यन्ते, मुक्तिश्च प्रकृत्यादिषु मध्ये न कस्य चिदपि संभवति त्रिगुणत्वेन सुखदुःखमोहात्मत्वात्, तस्मान्मुमुक्षुप्रवृत्त्युद्देश्यमोक्षाश्रयत्वेन पुरुषसिद्धिरिति संक्षेपः॥ १७॥

---

(१) समेत्योदयः समुदयः।

(२) गौणमुख्यभावेन।

(३) पञ्चम्यन्तानां पञ्चानां हेतूनामित्युचितम्।

(४) बुद्ध्यादिप्रपञ्चस्य।

(५) जलानयनादिरूपे कार्यविशेषे घटस्य कारणत्वं नान्यत्र।



---

जन्ममरणकरणानां
प्रतिनियमादयुगपत् प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं
त्रैगुण्यविपर्ययाच्चैव॥ १८॥

तदेवं पुरुषास्तित्वं प्रतिपाद्य तस्य बहुत्वं प्रतिपादयति जन्ममरणेति। पुरुषबहुत्वं सिद्धम्, कस्मात्, जन्ममरणकरणानां प्रतिनियमात्, आत्मनि देहसंबन्धो जन्म तत्त्याग एव मरणं करणानि चक्षुरादीनि० एषां प्रतिनियमः प्रत्येकमेव दर्शनं तस्मात्, आत्मन एकत्वे तन्न स्यात्, एकस्मिन् जाते मृते वा सर्व एव जाता मृता वा स्युः, एकस्मिन् सचक्षुषि सर्व एव सचक्षुषः स्युः, एकेन दृष्टे सर्वे द्रष्टारः स्युः, न च तथा, तस्माद्बहवः पुरुषा इति भावः। हेत्वन्तरमाह अयुगपत् प्रवृत्तेश्चेति, एकस्य धर्मेऽन्यस्य ज्ञानेऽन्यस्य वैराग्येऽन्य-

स्यैश्वर्येऽन्यस्य कामादावित्येवं प्रवृत्तिभेदादित्यर्थः, आत्मन एकत्वे सर्वेषामेकस्मिन्नेवार्थे युगपत् प्रवृत्तिः स्यात्, न च तथा, तस्मादपि बहवः पुरुषा इति भावः। हेत्वन्तरमाह त्रैगुण्यविपर्ययाच्चैवेति, एवकारोऽत्र भिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः, सिद्धमेव नासिद्धम्, त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययः परिणामभेदः क्वचित् सुखमेव क्वचिद्दुःखमेव क्वचिन्मोह एवेत्येवंविधस्तस्मात्, यद्वा त्रैगुण्येन विपर्ययो भेदः सात्त्विकराजसतामसभेदेन पुरुषस्य तस्मात्, एकत्वपक्षे तु तन्न स्यात् किं तु सर्वे सुखिनो दुःखिनो वा स्युः, एवं त्रिगुणभेदेन नीचोत्तममध्यमव्यवस्थापि न स्यात्, नचान्तःकरणभेदात् तथेति वाच्यम्, अन्तःकरणभेदे पुरुषभेदस्यैव बीजत्वात्, अन्यथा तद्भेदस्याप्रमाणकत्वादिति भावः ॥ १८ ॥

———

तस्माच्च विपर्यासात्
सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं
द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह तस्मादिति । त्रिगुणादेर्यो विपर्यासोऽत्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वमप्रसवधर्मित्वं च तस्मात्, तत्र चेतनत्वाद्द्रष्टृत्वं (१) स्वप्रकृतिशीलज्ञातृत्वं प्रकृतिर्मम संसारं कारयति न त्वहं संसारवान् किं तु पुष्करपलाशवन्निर्लिप्त इति धीमत्त्वम्, अत्रैगुण्यात् कैवल्यमात्यन्तिकदुःखशून्यत्वम्, तथा माध्यस्थ्यमुपकारापकारशक्तिरहितत्वम्, अकर्तृभावोऽकर्तृत्वमिच्छाद्वेषप्रयत्नादिशून्यत्वम्, अत एव साक्षित्वं ज्ञानैकस्वरूपत्वम्, कर्तृत्वादिमत्त्वे तदवभासक(२)-

(१) चेतनो हि द्रष्टा भवति नाचेतनः ।

(२) कर्तृत्वाद्यवभासकम् ।



ज्ञानैकरूपो न स्यात्, तद्धर्मशून्यस्यैव (१) दीपस्य घटादौ तदवभासकत्वदर्शनात्, इति संक्षेपः ॥ १९ ॥

———

तस्मात् तत्संयोगा-
दचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा
कर्तेव भवत्युदासीनः ॥ २० ॥

ननु कृतिर्बुद्धितत्त्वनिष्ठा चैतन्यमात्मनिष्ठं कथं तर्हि जानाम्यहमिदं करोमीति कृतिचैतन्ययोः सामानाधिकरण्यप्रतीतिस्तत्राह तस्मादिति । यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणके युक्तितः सिद्धे तस्मात्तद्भ्रान्तिरियमित्यर्थः, भ्रान्तिबीजं तत्संयोगः, तत्संयोगादिति, तस्य पुरुषस्य संयोगः संनिधानं प्रतिबिम्बवत्त्वं तस्मादचेतनमपि लिङ्गं बुद्धितत्त्वं चेतनावदिव जानामीति ज्ञानवदिव भवति, एवं गुणकर्तृत्वे, गुणाः सुखदुःखमोहरूपाः, कर्तृत्वं च तथा बुद्धिनिष्ठमात्मनि प्रतिबिम्बितं भवति, तेनोदासीनोऽपि पुरुषः करोमीति कर्तेव भवति, अतोऽहं जानाम्यहमिदं करोमीति प्रत्ययो धर्मिणोर्भेदाग्रहाद्विनिमयेन धर्मसंसर्गग्रहरूपो भ्रम एव, तयोस्तथात्वनिश्चयात्, इति संक्षेपः ॥ २० ॥

———

पुरुषस्य दर्शनार्थं
कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि
संयोगस्तत्कृतः सर्गः ॥ २१ ॥

किमर्थं तयोः संयोगस्तत्राह पुरुषस्येति । पुरुषस्य प्रधानस्य चो-

(१) कर्तृत्वादिधर्मशून्यस्य दृश्यधर्मशून्यस्यैव दृश्यधर्मावभासकत्वं दृश्यते ।

भयोरपि संयोगो दर्शनार्थं कैवल्यार्थं चेत्यन्वयः, दर्शनं भोगः प्रधानस्य पुरुषेण, कैवल्यं मोक्षः सत्त्वपुरुषान्यताख्यातिनिबन्धनः (१) पुरुषस्य, प्रधानेन विनाऽसंभवात्, तयोः प्रधानपुरुषयोर्द्वयोः संयोगो भोक्तृभोग्यभावकरं संनिधानं भवतीत्यर्थः। उभयस्य कार्यं० उभयस्यैवापेक्षेत्यत्र दृष्टान्तः पङ्ग्वन्धवदिति, यथा पङ्ग्वन्धयोरेकत्र मेलने पङ्गुरन्धस्य मार्गप्रदर्शनायान्धश्च पङ्गोर्नयनाय भवति तद्वदित्यर्थः । भोगापवर्गयोर्द्वारभूतः सर्गोऽपि संयोगादेवेत्याह तत्कृत इति, महदादिलक्षणः सर्गः संयोगजन्य एवेत्यर्थः, अत एव प्रलये न सर्गः, तयोस्तादृशसंयोगाभावादिति भावः ॥ २१ ॥

---

प्रकृतेर्महांस्ततोऽहं-
कारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्
पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥

सर्गक्रममाह प्रकृतेरिति। अत्रेयं प्रक्रिया, एकं प्रकृतितः किंचिन्न्यूनपरिमाणं महत्तत्त्वमंशांशिभावापन्नं जायते, तत्रांशा बुद्धितत्त्वाख्या आत्मसमसंख्याः शरीरप्रवेशार्हपरिमाणका जीवभोगाय भवन्ति, तेषामापूरिका प्रकृतिरेव, एवमहंकारो महत्तत्त्वादल्पपरिमाणोंऽशांशिभावापन्नो भवति, तत्रांशाः सूक्ष्मा आत्मसमसंख्यास्तथैव तद्भोगाय भवन्ति, षोडशको गणस्तु एकादशेन्द्रियाणि वक्ष्यमाणानि शब्दादीनि पञ्च तन्मात्राणि च, तस्मादपि (२) षोडशकात् तं षोडशकं प्राप्य स्थितेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्च महाभूतानि भवन्ति, तत्र शब्दतन्मात्रादाकाशं तस्य शब्दो गुणः, शब्दतन्मा-

(१) सत्त्वाद् बुद्धेः पुरुषस्यान्यताख्यातिर्भेदस्तन्निबन्धनो भेदप्रयुक्तो मोक्षः ।
(२) ल्यब्लोपे पञ्चमी ।



त्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणवान्, शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणकम्, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्राज्जलं शब्दस्पर्शरूपरसगुणम्, शब्दस्पर्शरूपरसतन्मात्रसहिताद्गन्धतन्मात्रात् पृथ्वी शब्दस्पर्शरूपरसगन्धगुणेति, अत्र संग्रहः, "वियदेकगुणं प्रोक्तं द्वौ गुणौ मातरिश्वनः । त्रयस्तेजसि चत्वारः सलिले पञ्च भूमिगाः" ॥ इति, अहंकारादेव पञ्च महाभूतानि भवन्त्विति तु न वक्तुं शक्यं शब्दादिगुणकानां तेषामहंकारत उत्पत्तेरसंभवात्, अहंकारस्य शब्दाद्यभावात्, न चाहंकारस्य पञ्चगुणवत्त्वे मानमस्ति, तथा सत्याकाशादीनां पञ्चानामेव पञ्चगुणवत्त्वं स्यात्, एवं बाह्येन्द्रियग्राह्यगुणवत्त्वस्यैव भूतत्वेन तस्यापि भूततापत्तौ स्वस्य स्वकारणत्वानुपपत्त्या तस्य (१) भूतकारणत्वश्रुतिविरोधश्च स्यात्, न चाहंकारस्य शब्दाद्यभावे कथं तस्माच्छब्दादितन्मात्रोत्पत्तिरिति वाच्यम्, हरिद्रादीनां चूर्णादिसंयोगेन तदुभयारब्धे रक्तरूपवन्महदहंकारादिसंयोगेन शब्दतन्मात्राद्युत्पत्तिसंभवात्, न च स्थूलानामप्येवमहंकारादुत्पत्तिर्वक्तुं शक्येति वाच्यम्, स्वविशेषगुणवद्द्रव्योपादानकत्वव्याप्येन (२) स्थूलत्वेन परिशेषात् सूक्ष्मद्रव्यारब्धत्वानुमानादहंकारोपादानकत्वनिरासात्। इत्याद्यन्यत्र विस्तरः। तन्मात्रत्वं च यज्जातीयेषु (३) शान्तघोरमूढाख्यविशेषत्र-

(१) अहंकारस्य ।
(२) स्वस्मात् कार्याद्विशेषगुणो विद्यते यस्मिन् द्रव्ये तत् स्वविशेषगुणवद् द्रव्यं तदेवोपादानं यस्य तत् स्वविशेषगुणवद्द्रव्योपादानकं तस्य भावः स्वविशेषगुणवद्द्रव्योपादानकत्वं तेन व्याप्यं स्वविशेषगुणवद्द्रव्योपादानकत्वव्याप्यं तेन । स्थूलत्वं व्याप्यं स्वविशेषगुणवद्द्रव्योपादानकत्वं च व्यापकत्वम्, यत्र स्थूलत्वं तत्र स्वविशेषगुणवद्द्रव्योपादानकत्वम्, स्वशब्देन महाभूतानि तत्र यो विशेषगुणः शब्दादिस्तद्वद् यद् द्रव्यं तदुपादानं यस्य तत् तस्य भावस्तत्त्वम् ।
(३) शब्दत्वादिजातीयेषु ।

यं न तिष्ठति तज्जातीयतदनाश्रय(१)शब्दस्पर्शरूपरसगन्धाश्रयसूक्ष्मद्रव्यत्वम्, शान्तं सुखात्मकम्, घोरं दुःखात्मकम्, मूढं मोहात्मकम्, तन्मात्राणि च देवादियोग्यत्वेन केवलं सुखात्मकान्येव सुखाधिक्यात्। सूक्ष्मत्वात् त्वयोग्यतया तेषामस्मदाद्यग्राह्यत्वमिति तत्त्वम् ॥२२॥

---

अध्यवसायो बुद्धि-
र्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं
तामसमेतद्विपर्यस्तम्॥ २३ ॥

बुद्धेर्लक्षणमाह० अध्यवसायो बुद्धिरिति। अध्यवसायो मयेदं कर्तव्यमित्याकारनिश्चयो दीपशिखेव बुद्धिपरिणामो (२) ऽवस्थाविशेषः, परिणामपरिणामिनोरभेदादभेदप्रयोगः, चैतन्यस्य (३) सदैकस्वभावस्य विषयावभासवैचित्र्यायेन्द्रियाणां व्यासङ्गोपपत्तये मनसो मदिष्टसाधनत्वबुद्धौ मदंशभानायाहंकारस्य कृत्यसाध्ये वृष्ट्यादौ प्रवृत्तिवारकस्याकर्तव्यत्वाध्यवसायस्य संभवाय बुद्धितत्त्वस्यावश्यकत्वमिति स्वयमूह्यम्। बुद्धिधर्मानाह धर्मो ज्ञानमिति। धर्मो गङ्गास्नानादिजन्योऽष्टाङ्गयोगजन्यश्च, ज्ञानमात्मसाक्षात्कारः, विरागो वैराग्यम्, तच्चतुर्विधं यतमानव्यतिरेकेन्द्रियवशीकारसंज्ञाभेदात्, तत्र रागादिकषायपाचनार्थं निवृत्तिधर्मारम्भो यतमानम्, पक्वापक्वानां दोषाणामभ्यस्यमानविवेकबलेन चिकित्सकवद्भेदकरणं व्यतिरेकः,

---

(१) शान्ताद्यनाश्रय— ।

(२) यथा दीपशिखा क्षणे क्षणे परिणमति, एवं बुद्धेः परिणामः ।

(३) चैतन्यस्य विषयाणामवभासो ज्ञानं तस्य वैचित्र्यायेन्द्रियाणामावश्यकत्वम्, मनसो व्यासङ्गोपपत्तये आवश्यकत्वम्, एवमग्रेऽपि योज्यम् ।



पक्वसर्वकषायज्ञानेन चित्तोत्सुकता (१) एकेन्द्रियम्, सर्वविषयतृष्णाराहित्येनौत्सुक्यस्यापि निवृत्तिर्वशीकाराख्यम्। ऐश्वर्यमिति, तदष्टविधम्, तदुक्तम्, "अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः। प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ गुणेष्वसङ्गो वशिता यत्कामस्तदवस्यति"। इति। मूर्तेः शरीरस्य, अणिमा० अणुत्वम्, महिमा योजनादिव्यापित्वम्, लघिमा तूलादिवल्लघुत्वम्, भूमिष्ठ एवाङ्गुल्यग्रेण चन्द्रमसं स्पृशतीत्यादिरूपसामर्थ्यमिन्द्रियैः प्राप्तिरित्युच्यते, श्रुतदृष्टेषु प्राकाम्यमिच्छानभिघातः० यथा भूमौ जलेष्विव निमज्जतीत्यादि, ईशिता तु भूतभौतिकानां सर्वेषां संकल्पमात्रेण प्रेरणम्, वशिता गुणभूताद्यनधीनता सत्यसंकल्पता यत्कामस्तदवस्यति तत् प्राप्नोतीत्यनेनोक्तम्। एतद्विपर्यस्तम्० एतद्विपरीतम्, अधर्माज्ञानावैराग्यानैश्वर्यरूपम्, तत्राधर्मः परस्त्रीसङ्गादिजन्यः, अज्ञानमनित्ये गृहक्षेत्रादौ नित्यबुद्धिः, अशुचौ स्त्रीकायादौ शुचिबुद्धिः, दुःखे संसारे सुखबुद्धिः, अनात्मनि देहादावात्मबुद्धिर्गौरोऽहमित्यादिका, अवैराग्यं विषयतृष्णा, अनैश्वर्यं स्वाभिप्रेतविपरीतम् ॥ २३॥

---

अभिमानोऽहंकार-
स्तस्माद् द्विविधः प्रवर्तते सर्गः।
ऐन्द्रिय एकादशक-
स्तन्मात्रापञ्चकश्चैव॥ २४ ॥

अहंकारस्य लक्षणमाह० अभिमानोऽहंकार इति। अभिमानोऽहमित्यन्तर्भावेन प्रत्ययोऽहमिमं जानामि करोमि मदिष्टसाधनमिदमत्राहमधिकृत इत्याद्याकारस्तस्य हेतुः (२), कार्यकारण-

---

(१) विषयाणां चित्ते केवलमुत्कण्ठा ।

(२) तस्याभिमानस्य हेतुरहंकारः ।

योरभेदादभिमानोऽहंकारः, अहमित्यव्यपदेश्यं पुरुषमहमिति व्यपदेश्यं करोतीति तादृशः, तन्निष्ठमहंकारत्वं भेदाग्रहात् पुरुषेऽपि भासते न तु सोऽप्यहंकार इत्यभिप्रायः। तस्य कार्यभेदमाह तस्माद् द्विविध इति। तस्मादहंकारात् सर्गः, सृज्यत इति सर्गः प्रपञ्चः, षोडशकगुणरूप अवान्तरव्यूहभेदेन द्विप्रकारः प्रवर्तते॰ उत्पद्यते। प्रकारद्वयमाह॰ ऐन्द्रिय इति। तत्र तस्मादहंकारादैन्द्रिय इन्द्रियजातीय एकादशको गणः, एकादशसंख्याको व्यूहः, च पुनः, तन्मात्रापञ्चकस्तन्मात्राजातीयः। एवकारो गणान्तरव्यवच्छेदकः ॥ २४ ॥

---

सात्त्विक एकादशकः
प्रवर्तते वैकृतादहंकारात्।
भूतादेस्तन्मात्रः
स तामसस्तैजसादुभयम् ॥ २५ ॥

ननु कथमेकस्मादहंकाराद् द्विविधः सर्गस्तत्राह सात्त्विक इति। प्रकाशलघिमभ्यामेकादशक इन्द्रियगणः सात्त्विकः॰ उद्रिक्त(१) सत्त्वगुणकाद् वैकृताद् विकृतोऽयमहंकार इति सांख्याचार्यसंकेतविषयादहंकारात् प्रवर्तते, भूतादेस्तामसादुद्रिक्ततमोगुणकादहंकारात् तन्मात्रको गणः प्रवर्तते, कस्मात्, यतः स तामसः, तामसगुणस्य समानजातीयकारणादेवोत्पत्तेरुचितत्वात्। ननु यदि सत्त्वतमोभ्यामेव कार्यं तदा रजसः किं प्रयोजनं तत्राह तैजसादुभयमिति। उत्कटरजोगुणका(२)दुभयम्, गणद्वयं भवति, सत्त्वतमसोः स्वतोऽक्रियत्वेन रजःप्रेर्यत्वात् तदुभयकार्यं रजःकार्यमेव, अतो रजोगुणोऽप्यावश्यक इति भावः। तत्रेन्द्रियजनकस्य वैकृतत्वकथनं

(१) उद्रिक्तत्वमुत्कटत्वम्।
(२) अहंकारादिति विशेष्यं ज्ञेयम्।



लघुकार्यजनकत्वाभिप्रायकम्, तन्मात्रजनकस्य भूतादित्वकथनं तामसत्वमहाकार्यजनकत्वाद्यभिप्रायकम्, रजोगुणकस्य तैजसत्वकथनं सृष्टिसमर्थत्वाभिप्रायकम्, इति बोध्यम् ॥ २५ ॥

---

बुद्धीन्द्रियाणि चक्षुः-
श्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायू-
पस्थाख्यकर्मेन्द्रियाण्याहुः ॥ २६ ॥

एकादशेन्द्रियाणां मध्ये दश बाह्येन्द्रियाणि, तान्याह बुद्धीन्द्रियाणीति। शब्दस्पर्शरूपरसगन्धा बुध्यन्त एतैरिति बुद्धीन्द्रियाणि चक्षुरादीनि रूपाद्युपलब्धिहेतुत्वेन सिद्धान्यतीन्द्रियाणि तत्तद्गोलकाधिष्ठितानि। तत्र चक्षुः॰ चष्टेऽनेनेति व्युत्पत्त्या चक्षुःपदाभिधेयं नयनं रूपादिषु मध्ये रूपस्यैव ग्राहकम्, श्रोत्रं शृणोत्यनेनेति व्युत्पत्त्या श्रोत्रपदाभिधेयं कर्णविवरसंज्ञकं शब्दादिषु मध्ये शब्दस्यैव ग्राहकम्, घ्राणं जिघ्रत्यनेनेति व्युत्पत्त्या घ्राणपदाभिधेयं गन्धादिषु मध्ये गन्धस्यैव ग्राहकम्, रसनं रसयत्यनेनेति व्युत्पत्त्या रसनपदाभिधेयं रसादिषु मध्ये रसस्यैव ग्राहकम्, त्वक् स्पर्शं स्पृशत्यनेनेति व्युत्पत्त्या स्पर्शपदाभिधेयं त्वक्स्थानीयत्वात् त्वगिन्द्रियं सर्वशरीरव्यापि स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकम्, तत्र त्वक्चक्षुषी द्रव्यस्यापि ग्राहके, अन्यानि तु गुणमात्रग्राहकाणीति विवेकः। वागादीनि कर्म कुर्वन्तीति कर्मेन्द्रियाणि, तद्विषया वक्ष्यन्ते। एतेषां सर्वेषामिन्द्रियसंज्ञा कुत इति चेत्, इंपदेन विषयास्तान् प्रति द्रवन्तीति व्युत्पत्त्येति गृहाण। चक्षुरादीनां तत्तद्भूतगुणग्राहकत्वेन तत्तद्भूतारब्धत्वानुमानं तु न साधीयोऽप्रयोजकत्वादिति (१)

(१) अप्रयोजकत्वशङ्काग्रस्तत्वादित्यर्थः।

स्वयमूह्यम् ॥ २६ ॥

---

उभयात्मकमत्र मनः
संकल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषा-
न्नानात्वं बाह्यभेदाश्च ॥ २७ ॥

एकादशमिन्द्रियं मनस्तल्लक्षणमाह॰ उभयात्मकमिति । मनःसंज्ञकमिन्द्रियं संकल्पकम्, सामान्यत इन्द्रियेण गृहीतमर्थं सम्यक् कल्पयति विशेषणविशेष्यभावेन चेतयतीति विशिष्टधीजनकं कार्यकारणयोरभेदात् तदात्मकम्, अत एवोभयात्मकम्, बुद्धीन्द्रियसहकारित्वात् तदात्मकम् (१), कर्मेन्द्रियसहकारित्वात् कर्मेन्द्रियात्मकं च, मनोऽधिष्ठानेनैव तेषां स्वकार्यजननात् । ननु भवतु मनो महदहंकारवत् तत्तदिन्द्रियसहकारि, परंतु तद्वदेव (२) नेन्द्रियं भवितुमर्हति तावन्मात्रेण (३) तस्येन्द्रियत्वेऽतिप्रसङ्गा(४)त्, तत्राह इन्द्रियं चेति । कुतः, साधर्म्यात्, इन्द्रियान्तरैः सात्त्विकाहंकारोपादानत्वं साधर्म्यं तस्मात्, महदहंकारयोस्तु नेन्द्रियत्वं तथा(५)त्वाभावादिति भावः । एतेन मनो नेन्द्रियं प्रत्यक्षत्वादिन्द्रियस्य चातीन्द्रियत्वादिति वदतां केषांचिन्मतमसम्यगिति ध्वनितम्, इन्द्रियलक्षणस्य स्वमते प्रकृतसाधर्म्यस्यातीन्द्रिय(६)त्वविशेषणागर्भितत्वादित्यास्तां विस्तरः । ननु कथं सात्त्विकादहंकारादे-

(१) बुद्धीन्द्रियात्मकम् ।
(२) महदहंकारवदेव ।
(३) इन्द्रियसहकारित्वमात्रेण ।
(४) इन्द्रियसहकारित्वेन मनस इन्द्रियत्वं चेत् तदेन्द्रियसहकारित्वमालोकादीनामपि भवति तेषामपीन्द्रियत्वं स्यात् ।
(५) साधर्म्याभावात् ।
(६) न चातीन्द्रियत्वे सति साधर्म्यत्वमिन्द्रियत्वमिति लक्षणं कुर्मः ।



कस्मादेकादशेन्द्रियाणि तत्राह गुणपरिणामेति । गुणानां सत्त्वादीनां यः परिणामविशेषोऽदृष्टविशेषादिरूपस्तस्मात्, तथा च सहकारिभेदात् कार्यभेद इति भावः । बाह्यभेदाश्चेति दृष्टान्तार्थम्, यथा बाह्यभेदास्तथैतदपीति भावः । ग्राह्यभेदाच्चेति पाठे तु ग्राह्यभेदादपीन्द्रियभेद आवश्यको बोध्य इत्यर्थः ॥ २७ ॥

रूपादिषु पञ्चाना-
मालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणो-
त्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥

तत्र बाह्येन्द्रियेषु ज्ञानेन्द्रियाणां व्यापारमाह रूपादिष्विति । पञ्चानां बुद्धीन्द्रियाणां चक्षूरसनघ्राणश्रोत्रत्वचां रूपादिषु रूपरसगन्धशब्दस्पर्शेषु॰ आलोचनं निर्विकल्पकं वृत्तिः फलम्, मात्रपदादादानादिक्रियाव्यवच्छेदः, तत्र चक्षुषो रूपे रसनाया रसे घ्राणस्य गन्धे श्रोत्रस्य शब्दे त्वचः स्पर्शे सामर्थ्यमिति विवेकः । कर्मेन्द्रियव्यापारमाह वचनेति । पञ्चानां कर्मेन्द्रियाणां वचनादीनि कर्माणि, व्यापारा इत्यर्थः । तत्र वचनम्॰ उच्यतेऽनेनेति कण्ठताल्वादिकर्म(१) वागिन्द्रियस्य, आदानं ग्रहणं हस्तस्य, विहरणं गमनं पादयोः, उत्सर्गो मलत्यागानुकूलं कर्म पायोः, आनन्दः॰ आनन्दयतीति व्युत्पत्त्या रतिरूपस्थस्य, इति बोध्यम् ॥ २८ ॥

---

स्वालक्षण्यं वृत्ति-
स्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः

(१) क्रियेत्यर्थः ।

प्राणाद्या वायवः पञ्च ॥ २९ ॥

बुद्ध्यहंकारमनसां वृत्तिमाह स्वालक्षण्यमिति। स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महदहंकारमनांसि तेषां भावः स्वालक्षण्यं वृत्तिर्व्यापारः, तत्र महतोऽध्यवसायः, अहंकारस्याभिमानः, मनसः सविकल्पकं संकल्पापरपर्यायं भेदकमित्यर्थः। साधारणत्वासाधारणत्वाभ्यां वृत्तेर्द्वैविध्यमाह सैषेति। एषा वृत्तिः० असामान्या० असाधारणी। सामान्यामाह सामान्येति। सामान्या चासौ करणवृत्तिश्चेति सामान्यकरणवृत्तिः, पञ्च प्राणाद्या वायवः, जीवनादिद्वारा सर्वकरणव्यापारबीजत्वात्, तदन्वयव्यतिरेकानुविधायित्वात्, इन्द्रियव्यापारस्य च तद्व्यापारान्वयानुविधायित्वात्, प्राणादीनां भेदः स्थानभेदादुक्तो ग्रन्थेषु, यथा "हृदि प्राणो गुदेऽपानः समानो नाभिदेशगः। उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः" ॥ इत्यास्तां विस्तरः ॥ २८ ॥

---

युगपच्चतुष्टयस्य हि
वृत्तिः क्रमशश्च तस्य निर्दिष्टा।
दृष्टे तथाप्यदृष्टे
त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥

असाधारणेषु व्यापारेषु यौगपद्यक्रमावाह युगपदिति। दृष्टे प्रत्यक्षविषये तस्य चतुष्टयस्य बाह्येन्द्रियमनोहंकारमहत्तत्त्वस्य युगपद्वृत्तिः क्रमशश्च भवति, तथाहि विद्युत्संपाते व्याघ्रादाविन्द्रियसंनिकर्षे युगपदेव निर्विकल्पकसविकल्पकाभिमानाध्यवसायाः प्रादुर्भवन्ति, अतस्ततो झटित्यपसरति। क्रमशश्च। यदा मन्दालोके प्रथमं किंचिदिदमिति जानाति पश्चादमुकमिति निश्चिनोति ततो मां प्रत्येतीत्यभिमन्यते० अथाध्यवस्यति० अपसरामीतः स्थानात्, इत्येवं क्रमेण तेषामेते व्यापारा भवन्ति। तथाऽदृष्टे परोक्षविषयेऽपि त्रयस्य० इन्द्रिय(१)रहिततत्त्रयस्य युगपत् क्रमशश्च व्यापारा ज्ञेयाः। अनुमानशब्दयोर्विषये इन्द्रियाप्रवृत्तेस्त्रयस्येत्युक्तम्, तयोर्विषये निर्विकल्पकाभावात् प्रथमं मनस एव व्यापारः, अनुमानशब्दविषये वृत्तिर्हि तत्पूर्विका दृष्टपूर्विकेति विशेषः। अनुमाने व्याप्तिज्ञानार्थं प्रत्यक्षापेक्षा, शब्दे शक्त्यनुमानापेक्षया प्रत्यक्षापेक्षेति संक्षेपः ॥ ३० ॥



---

स्वां स्वां प्रतिपद्यन्ते
परस्पराकूतहेतुकां वृत्तिम्।
पुरुषार्थ एव हेतु-
र्न केनचित् कार्यते करणम् ॥ ३१ ॥

ननु युगपत् पक्षो न संभवति, इन्द्रियव्यापाराधीनप्रवृत्तिकत्वान्मनसः, एवमहंकारमहतोर्मनोऽहंकारव्यापाराधीनव्यापारकत्वात्, तत्राह स्वां स्वामिति। आकूतमभिप्रायः स चाचेतनानां बाधित इत्याकूतमत्र प्रवृत्त्युन्मुखत्वम्, तच्चैकस्य (२) व्यापारजननसमय एव, तथा चासति बाधकेऽन्यस्यापि स काल इति यौगपद्यं संभवति, क्रमपक्षे संशयादिरेव बाधक इति बोध्यम्। स्वां स्वां प्रतिपद्यन्त इत्यनेन युगपत् प्रवृत्तावपि याष्टीकशाक्तीकानामिव हेतुभेदान्न वृत्तिसंकर इति ज्ञापितम्। तथापि करणं केन प्रेर्यते तत्राह पुरुषार्थेति। भोगापवर्गलक्षणः पुरुषार्थ एव स्वविषयकेच्छाद्वारा करणव्यापारहेतुरित्यर्थः। कार्यते प्रेर्यते, तत्रेच्छावान् जीवः कर्ता आवश्यकः, ईश्वरस्तु न, तदपेक्षायां मानाभावादिति भावः ॥ ३१ ॥

---

करणं त्रयोदशविधं

(१) इन्द्रियमत्र बाह्यम्।
(२) इन्द्रियस्येत्यर्थः।

तदाहरणधारणप्रकाशकरम् ।
कार्यं च तस्य दशधा-
हार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥

करणानि कानि तत्राह करणमिति । त्रयोदशविधं बुद्ध्यहंकारौ० एकादशेन्द्रियाणि च, एषां व्यापारानाह ० आहरणेत्यादि, तत्राहरणं कर्मेन्द्रियाणाम्, धारणं महदहंकारमनसाम्, स्ववृत्तिप्राणादिपञ्चद्वारा देहधारणात्, प्रकाशो बुद्धीन्द्रियाणां व्यापारः । विषयाः कतिविधास्तत्राह कार्यं चेति । तस्य त्रयोदशविधस्य, तत्राहार्यं (१) दिव्यादिव्यभेदेन प्रत्येकं द्वैविध्याद्दशधा कर्मेन्द्रियाणाम्, एवं धार्यं शरीरादिकमारम्भकभूतानाम् (२) दिव्यादिव्यभेदाद्दशधा, बुद्ध्यहंकारमनसां प्रकाश्यं शब्दस्पर्शरूपरसगन्धाख्यं दिव्यादिव्यभेदाद्दशधा बुद्धीन्द्रियाणाम् ॥ ३२ ॥

---

अन्तःकरणं त्रिविधं
दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं
त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

त्रयोदशकरणानां भेदमाह ० अन्तःकरणमिति । महदहंकारमनोभेदेन त्रिविधमन्तःकरणम् (३), बाह्यं करणं दशधा पञ्चबुद्धीन्द्रियपञ्चकर्मेन्द्रियभेदात्, त्रिविधस्यान्तःकरणस्य विषयं व्यापारमाख्याति जनयतीति विषयाख्यम्, मनोऽहंकारबुद्धीनां व्यापारेषु बुद्धीन्द्रियव्यापारस्योपयोगात्, कर्मेन्द्रियव्यापारस्यापि बुद्धीन्द्रियद्वा-

(१) आहार्यं व्याप्यं वचनादानविहरणोत्सर्गानन्दाख्यम् ।
(२) पृथिव्यादीनां पञ्चानाम् ।
(३) शरीराभ्यन्तरवृत्तित्वादन्तःकरणम् ।



रान्तःकरणव्यापारे उपयोगः, कर्मेन्द्रियव्यापारेण जनिते पदार्थे बुद्धीन्द्रियप्रवृत्त्यान्तःकरणप्रवृत्तेः । बाह्येन्द्रियं किं तत्राह साम्प्रतकालं वर्तमानमात्रविषयकम्, बाह्यं बहिरिन्द्रियम्, कर्मेन्द्रियस्य तत् (१) परंपरया (२) बोध्यम् । त्रिकालम्, अतीतामागतवर्तमानविषयम्, तत्रानुमानशब्दसहकारिणातीतानागतविषयकम्, इन्द्रियसहकारेण वर्तमानविषयकम्, आभ्यन्तरं मनोबुद्ध्यहंकाराख्यम् ॥ ३३ ॥

---

बुद्धीन्द्रियाणि तेषां
पञ्च विशेषाविशेषविषयाणि ।
वाग्भवति शब्दविषया
शेषाणि तु पञ्चविषयाणि ॥ ३४ ॥

बाह्येन्द्रियाणां विषयान् विवेचयति बुद्धीति । तेषां दशानामिन्द्रियाणां मध्ये बुद्धीन्द्रियाणि, विशेषा योग्या अविशेषा अतीन्द्रियास्त एव विषया येषां तादृशानि, तत्र योग्यायोग्ययोर्ग्रहणं योगीन्द्रियाणाम्, योग्यमात्रग्रहणमस्मदादीन्द्रियाणाम् । एवं कर्मेन्द्रियेषु वाक् शब्दविषया तज्जनकत्वात्, शब्दश्च (३) न तन्मात्ररूपस्तस्याहंकारजन्यत्वात् । शेषाणि पाणिपादपायूपस्थानि पञ्चविषयाणि पाण्याद्याहार्याणां घटादीनां पञ्चशब्दाद्यात्मकत्वादिति ॥ ३४ ॥

---

सान्तःकरणा बुद्धिः
सर्वं विषयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं

(१) वर्तमानविषयत्वम् ।
(२) बुद्धीन्द्रियद्वारा ।
(३) वाक्यजन्यशब्दश्च ।

द्वारि द्वाराणि शेषाणि ॥ ३५ ॥

बाह्येन्द्रियाणामप्राधान्यं वक्तुमाह सान्तःकरणेति। अन्तःकरणे मनोऽहंकारौ ताभ्यां सहिता बुद्धिः ० यस्मात् सर्वमिन्द्रियोपनीतं विषयं पुरुषोपकारकमवगाहतेऽध्यवस्यति तस्मात् तत् त्रिविधमन्तःकरणं द्वारि (१) द्वारमस्यास्तीति कृत्वा, शेषाणि दशेन्द्रियाणि द्वाराणि (२) साक्षात्परम्परया वेन्द्रियद्वारैवान्तःकरणानां विषयावगाहनात्, द्वारत्वं चान्योपकारकत्वम्, तच्चालोचनद्वारा प्रागुक्तदिशा बोध्यम् ॥ ३५ ॥

---

एते प्रदीपकल्पाः
परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं
प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥

अन्तःकरणेषु बुद्धेः प्राधान्यं वक्तुमाह ० एते प्रदीपकल्पा इति। एते गुणविशेषा गुणानां भेदाः सत्त्वाद्या येषु ते दशेन्द्रिय(३)मनोऽहंकाराः पुरुषस्य कृत्स्नमर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति तत्र प्रकाशयन्ति यथा दीपो घटं प्रकाश्य पुरुषे प्रापयति ॥ ३६ ॥

---

सर्वं प्रत्युपभोगं
यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः
प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥

(१) प्रधानम् ।
(२) अप्रधानानि ।
(३) दशसंख्याकेन्द्रिय—इति वरः पाठः ।



बुद्धिरपि न स्वार्था किंतु परार्थैवेत्याह सर्वमिति। सर्वं शब्दादियोग्यं प्रति य उपभोगः पुरुषस्य तं यस्मात् साधयति तस्मात् सा प्रधानापि (१) परार्थैव, न स्वार्थेति भावः। मोक्षहेतुज्ञानजनकत्वादपि सा तथेत्यभिप्रेत्याह सैव पुनर्विवेकदशायां प्रधानपुरुषयोरन्तरं वैलक्षण्यं सूक्ष्ममतिदुर्ज्ञेयं विशिनष्टि विषयीकरोति, अध्यवसायरूपत्वाद्बुद्धिरेव तथेति (२) भावः ॥ ३७ ॥

---

तन्मात्राण्यविशेषा-
स्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः
शान्ता घोराश्च मूढाश्च ॥ ३८ ॥

अविशेषविशेषावुक्तौ तौ कावित्यत आह तन्मात्रेति। तन्मात्राणि शब्दादीनि ० अविशेषाः, अयोग्यत्वात्, तेभ्यस्तन्मात्रेभ्यः पञ्चभ्यो भूतानि स्थूलानि पृथिव्यादीनि, एते पृथिव्यादयः ० विशेषाः, योग्यत्वात्, कुतः, शान्ता इति। च एको हेतौ द्वितीयः समुच्चये, यस्मादाकाशादिषु स्थूलेषु केचित् शान्ताः सत्त्वप्रधानतया सुखकराः प्रसन्ना लघवश्च, केचिद्रजःप्रधानतया घोरा दुःखकराः, केचित् तमःप्राधान्यान्मूढा मोहकरा गुरवश्च गुणानां गुणप्रधानभावतो यथेदं तथोपपादितमधस्तात् (३) ॥ ३८ ॥

---

सूक्ष्मा मातापितृजाः
सह प्रभूतैस्त्रिधा विशेषाः स्युः ।

(१) प्रधानमपीति वरः पाठः ।
(२) प्राधान्यवतीति ।
(३) पूर्वम् ।

सूक्ष्मास्तेषां नियता
मातापितृजा निवर्तन्ते ॥ ३९ ॥

एतावन्त एव विशेषा इति न किंत्वन्येऽपि सन्तीत्याह सूक्ष्मेति। सूक्ष्मा लिङ्गशरीराख्याः, मातापितृजाः स्थूलदेहाः, प्रभूताः पर्वतवृक्षाद्याः, विशेषकार्यत्वाद्विशेषाः, तत्र सूक्ष्मदेहाः सूक्ष्मतन्मात्राद्यारब्धत्वात्, मातापितृजास्तु मातापितृभुक्तान्नजशुक्रशोणिताद्यारब्धत्वात्, प्रभूतास्तु तद्विलक्षणकारणकत्वात्, तेषां मध्ये सूक्ष्मा नियता आमोक्षावस्थायिनः, मातापितृजा निवर्तन्ते मरणकाले पतन्ति, उपलक्षणमेतत् प्रभूतानाम्, तेऽपि निवर्तन्त इति बोध्यम्, विशिष्य कथनं तु गौणजीवत्वाभिप्रायकं बोध्यम् ॥ ३९ ॥

---

पूर्वोत्पन्नमसक्तं
नियतं महदादि सूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं
भावैरधिवासितं लिङ्गम् ॥ ४० ॥

लिङ्गशरीरधर्मानाह पूर्वोत्पन्नमिति। पूर्वस्मिन्नादिसर्गे पूर्वस्मात् प्रधानादुत्पन्नमाविर्भूतम्, असक्तम्० अव्याहतं शिलामप्यनुप्रविशति, नियतं प्रत्यात्म भिन्नम्, महदादिसूक्ष्मपर्यन्तं महदहंकारमनोदशेन्द्रियतन्मात्रसमुदायरूपम्, संसरति नवं नवं स्थूलशरीरमुपादत्ते पूर्वं पूर्वं च जहाति, निरुपभोगं स्थूलदेहं विना भोगायासमर्थम्, भावैरधिवासितं भावैर्यागादिभिरन्तर्भावैश्चाधिवासितं कृतसंस्काराधानम्, यागजसंस्कारोऽदृष्टमेव ॥ ४० ॥

---

चित्रं यथाश्रयमृते
स्थाण्वादिभ्यो विना यथा छाया।



तद्वद्विना विशेषैस्तिष्ठति
न निराश्रयं लिङ्गम् ॥ ४१ ॥

ननु तर्हि साहंकारेन्द्रियबुद्धित एव भोगोऽस्तु कृतं सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह चित्रं यथेति। आश्रयं विना यथा चित्रं न तिष्ठति तदाश्रित्यैव तिष्ठति तद्वद्विशेषैरतिसूक्ष्मैः शरीरैर्विना लिङ्गं लिङ्गनाज्ज्ञापनाद्बुद्ध्यादिकं वृत्तितन्मात्रादिसमुदायरूपत्वान्निराश्रयं न तिष्ठति किंतु सूक्ष्मशरीराश्रितमेव तिष्ठति, अतस्तेषां धर्मिभूतं सूक्ष्मशरीरमावश्यकम्, "ततः सत्यवतः कायात् पाशबद्धं वशं गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः" ॥ इत्यादिप्रमाणाच्चेति भावः। केचित्तु स्थूलशरीरावश्यकत्वाभिप्रायकमिदमिति वर्णयन्ति, तथाहि लिङ्गं समुदायात्मकं लिङ्गशरीरं विशेषैः स्थूलदेहैर्विना निराश्रयं सन्न तिष्ठति किंतु स्थूलशरीरमाश्रित्यैव तिष्ठति, अतो न लिङ्गशरीरेण स्थूलशरीरस्यान्यथा सिद्धिरिति भावः। शेषं प्राग्वत् ॥ ४१ ॥

---

पुरुषार्थहेतुकमिदं
निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगा-
न्नटवद्व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

एवं सूक्ष्मशरीरास्तित्वमुपपाद्य यथा संसरति येन च हेतुना तदुभयमप्याह पुरुषार्थेति। निमित्तं धर्मादि नैमित्तिकं धर्मादिकारणकं स्थूलदेहादि तदुभयप्रसङ्गेन तदुभयसंबन्धेन लिङ्गमिदं सूक्ष्मशरीरं नटवद्व्यवतिष्ठते यथा नटो बहूनि विविधानि रूपाणि गृहीत्वा व्यवहरति तथेदमपि देवादिशरीरं परिगृह्य व्यवहरति, किमर्थं तत्राह पुरुषार्थहेतुकमिति। पुरुषार्थो हेतुर्निमित्तं यस्य तादृश-

म्, पुरुषार्थफलकमिति यावत्। तत्तद्भोगादृष्टबलात् तत्तद्भोगार्थमेव तथा व्यवहरतीत्यर्थः। कुतोऽस्यैवंविधो महिमा तत्राह प्रकृतेर्विभुत्वयोगादिति। तथा च पुराणम्, "वैश्वरूप्यात् प्रधानस्य परिणामोऽयमीदृश" ॥ इति, प्रकृत्यापूरापगमाभ्यां महदल्पादिकं सर्वमुपपद्यत इति भावः ॥ ४२ ॥

---

सांसिद्धिकाश्च भावाः
प्राकृतिका वैकृतिताश्च धर्माद्याः।
दृष्टाः करणाश्रयिणः
कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥

प्राकृतवैकृतयोरप्रसिद्धत्वात् तौ कौ तत्राह सांसिद्धिकाश्चेत्यादि। भावा धर्माद्या ये सांसिद्धिकाः स्वाभाविकास्त एव प्राकृतिकाः, यावद्वस्तुस्थायिनो यथा महत्तत्त्वादहंकारादयः, वैकृतिकाः कदाचिद्वृत्तयः, तेषां मध्ये धर्माद्याः, करणं बुद्धितत्त्वम्, तदाश्रयिणो दृष्टाः सांख्याचार्यैः। कार्याश्रयिणः, कार्यं शरीरं तदाश्रयिणः कललाद्याः, कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहा गर्भस्थस्य, ततो निर्गतस्य बाल्यकौमारयौवनवार्द्धकानीति संक्षेपः॥ ४३ ॥

---

धर्मेण गमनमूर्ध्वं
गमनमधस्ताद् भवत्यधर्मेण।
ज्ञानेन चापवर्गो
विपर्ययादिष्यते बन्धः ॥ ४४ ॥

बुद्धिनिष्ठानां धर्मादीनां प्रयोजनमाह धर्मेणेति। केवलशुक्लेन (१)

(१) जपादिना।



परहिंसावर्जितेन, शुक्लकृष्णेन (१) च परहिंसापूर्वकेण ० ऊर्ध्वं ब्राह्मप्राजापत्यैन्द्रगान्धर्वयाक्षपैशाचादिषु लोकेषु, अधस्ताद् रौरवमहारौरववह्निवैतरणीकुम्भीपाकतामिस्रान्धतामिस्रादिनरकेषु ० अधर्मेण शास्त्रनिषिद्धाचरणेन परपीडादिना, गमनं भवति, ज्ञानेनात्मसाक्षात्कारेण ० अपवर्गो मोक्षः, विपर्ययात् ० अज्ञानाद्बन्धः प्राकृतिकवैकृतिकदाक्षिणभेदेन त्रिविधः, तत्र प्राकृतिकः ० आत्मबुद्ध्या प्रकृत्युपासननिबन्धनो यथा "पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः"। इति, वैकृतिक आत्मबुद्धेन्द्रियोपासननिबन्धनो यथा "दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः" । इत्यादि। दाक्षिणः पुरुषमजानतः कामनया वैदिककर्मानुष्ठाननिबन्धनो यथा "पुरुषज्ञानहीनानां स्वर्गाद्यर्थं हि कुर्वताम्। तानि तानीह कर्माणि तेषां बन्धस्तु दाक्षिणः" ॥ इति। संज्ञा तु दक्षिणासंबन्धनिबन्धना बोध्येति संक्षेपः ॥ ४४ ॥

---

वैराग्यात् प्रकृतिलयः
संसारो भवति राजसाद्रागात्।
ऐश्वर्यादविघातो
विपर्ययात् तद्विपर्यासः ॥ ४५ ॥

"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये"ति श्रुत्या पुरुषज्ञस्यैव मोक्षकथनेनान्यस्य मोक्षाभावकथनाज्ज्ञानरहितस्य विरक्तस्यापि न मोक्ष इत्याशयवानाह वैराग्यादिति। दृष्टानुश्रविकविषयेष्वलंबुद्धिविशेषरूपाद्वैराग्यात् केवलात् प्रकृतिलयः, प्रकृतिपदेन महदहंकारादयोऽपि गृह्यन्ते, तेष्वात्मबुद्ध्योपास्यमानेषु लयो भवतीत्यर्थः। राजसाद् रजःकार्याद् रागात् कामक्रोधादेः संसारो भवति, तत्र यागादिगोचरात् स्वर्गादिः, स्त्र्यादिगोचरादि-

(१) यागादिना।

ह लोकभोग एवेति विवेकः, ऐश्वर्यादणिमादिलक्षणात् ० अविघातो गतिप्रतिबन्धाभावः, विपर्ययादनैश्वर्यात् तद्विपर्यासः सर्वत्र गतिविच्छेदः, यथा कस्यचिदनीश्वरस्य परगृहे प्रतिघातः ॥ ४५ ॥

---

एष प्रत्ययसर्गो
विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्दात्
तस्य च भेदास्तु पञ्चाशत् ॥ ४६ ॥

ननु विपर्ययाद्याः सांख्यज्ञेभ्यः श्रूयन्ते, किं ते तत्त्वान्तराणि कतिविधा वा तत्राह० एष इति । विपर्ययश्चाशक्तिश्च तुष्टिश्च सिद्धिश्च ० आख्या नामानि यस्य ० एष गणः प्रत्ययो बुद्धिस्तत्सर्गस्तज्जन्यः, तथा च बुद्धितत्त्वे प्रविष्टो न तत्त्वान्तरं कार्यकारणाभेदात्, तस्य भेदाः पञ्चाशद्वक्ष्यन्ते, ननु कथमेककारणादेतानि कार्याणि तत्राह गुणवैषम्यविमर्दादिति । गुणानां वैषम्यं न्यूनाधिकबलता मन्दमध्याधिकभावेन नानाविधा तया विमर्दो गुणस्य गुणयोर्वा ० अभिभवः, तस्मादित्यर्थः । तदेवं कार्यकारणयोरभेदेन विपर्ययस्याज्ञानेऽशक्तेरधर्मे तुष्टेर्धर्मे सिद्धेर्ज्ञान इति विवेकः । अज्ञानादयस्तु बुद्धेरेवातो विपर्ययादयोऽपि न तत्त्वान्तरमित्यास्तां विस्तरः ॥ ४६ ॥

---

पञ्च विपर्ययभेदा
भवन्त्यशक्तिस्तु करणवैकल्यात् ।
अष्टाविंशतिभेदा
तुष्टिर्नवधाष्टधा सिद्धिः ॥ ४७ ॥

पञ्चाशदिति सामान्यत उक्तम्, तत्र कस्य कतिविधा भेदास्त-



त्राह पञ्च विपर्ययेति । विपर्ययः संसारबीजम्, क्लेशाः पञ्च ० अविद्यास्मितारागद्वेषाभिनिवेशास्तेषामेव यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः, अभिनिवेशो भयम्, ननु रोगादिकृतानामशक्तीनां रोगसमसंख्यतया कथमष्टाविंशतिधाऽशक्तिस्तत्राह करणवैकल्यादिति । करणानां बुद्धितत्त्वैकादशेन्द्रियाणां यद्वैकल्यं बधस्तस्माद्याऽशक्तिः साऽष्टाविंशतिधेत्यर्थः, शेषं सुगमम् ॥ ४७ ॥

---

भेदस्तमसोऽष्टविधो
मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा
तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

पञ्चानां विपर्ययाणामवान्तरभेदमाह भेदस्तमस इति । अष्टसु प्रकृतिमहदहंकारपञ्चतन्मात्रेष्वात्मबुद्धिरविद्या, तस्या एव तम इतिसंज्ञा, तस्या अष्टविधविषयकत्वादष्टविधत्वम् । अणिमाद्यैश्वर्यं प्राप्य सिद्धोऽहमस्मीत्यात्मन्यहंभावेनाभिमानविशेषोऽस्मिता, अणिमाद्यष्टैश्वर्यविषयकत्वात् तस्या अष्टविधत्वम्, सैव च मोहसंज्ञिका, मोहस्य चेति, चकारादष्टविध इत्यन्वेति । शब्दादिषु पञ्चसु विषयेषु दिव्यादिव्यतया दशविधेषूपादेयत्वबुद्ध्या रागः, स एव महामोहः, विषयस्य दशविधत्वादस्य दशविधत्वम् । परेण भुज्यमानेषु दशसु शब्दादिविषयेषु परेण प्राप्तेषु चाणिमादिष्वष्टसु द्वेषस्तामिस्राख्यः, अष्टादशविषयत्वादस्याष्टादशविधत्वम् । अभिनिवेशस्त्रासः, अन्धतामिस्राख्यः, शब्दादयो दशाणिमाद्यैश्वर्यं चाष्टविधं केषांचिद्विनङ्क्ष्यति चेति भयम्, अष्टादशविषयकत्वादष्टादशविधम् । तदेवं विपर्ययभेदा द्वाधिकषष्टिरिति ॥ ४८ ॥

---

एकादशेन्द्रियवधाः
सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदशधा च बुद्धे-
र्विपर्ययात् तुष्टिसिद्धीनाम् ॥ ४९ ॥

अशक्तेरष्टाविंशतिभेदानाह ० एकादशेति । एकादशेन्द्रियाणां श्रोत्रत्वगक्षिरसनघ्राणवाक्पाणिपादपायूपस्थमनसां वधाः, वैगुण्यानि यथा, यथासंख्यम्, "बाधिर्यं कुष्ठितान्धत्वं जडताऽजिघ्रता तथा । मूकता कौण्य(१)पङ्गुत्वक्लैब्योदावर्तमत्तताः" ॥ एतद्धेतुका स्वव्यापारे बुद्धेरशक्तिरिति सह बुद्धिवधैरित्युक्तम् । अधुना कति बुद्धेः स्वरूपतो वधास्तत्राह सप्तदशधेति । तुष्टिर्नवधा वक्ष्यते, एवं सिद्धिरप्यष्टधा, तेषां (२) विपर्ययाद् व्यतिरेकादिति ॥ ४९ ॥

---

आध्यात्मिक्यश्चतस्रः
प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात्
पञ्च नव तुष्टयोऽभिमताः ॥ ५० ॥

तुष्टेर्नव भेदानाह ० आध्यात्मिक्यश्चेति । प्रकृत्यादिभिन्नत्वेनात्मसाक्षात्कारो मोक्षोपायः, परंतु साक्षात्कारः प्रकृतेः परिणामविशेषः प्रकृतित एव भविष्यतीति कृत्वा तत्र न यतते तस्य प्रकृत्याख्या तुष्टिरम्भ इत्युच्यते । कश्चिदेवं चिन्तयति, न प्रकृतिमात्रात् स भवति तथा सति गृहस्थस्यापि संभवेत् किंतु संन्यासाश्रमोपादानात् स भविष्यतीत्यालस्यादिना तुष्ट्या तिष्ठति, तस्योपादानाख्या सलिलमित्युच्यते, सैव परिव्रज्याख्या तुष्टिरिति गीयते । प्रव्रज्याख्यापि

(१) हस्तदोषः ।
(२) पुंस्त्वं वधाभिप्रायम् ।



कालविशेषं प्राप्य तं करिष्यतीति, अतः कालस्यैव प्राधान्याज्ज्ञानप्राप्तिकाले ज्ञानं भविष्यत्येवेत्यलं प्रयासेनेति तुष्टिः कालाख्या मेघ इत्युच्यते । कालविशेषेऽपि स भाग्यबलादेव भवति, अतो भाग्यमेव हेतुर्नान्यदित्यलं प्रयासैरिति तुष्टिर्भाग्याख्या वृष्टिरित्युच्यते । एताश्चतस्र आध्यात्मिक्यः । विषयोपरमो वैराग्यं तेन तुष्टयः पञ्च बाह्याः, प्रकृत्यादिभिन्नत्वेनात्मज्ञानाभावात्, तथाहि ० अर्जनरक्षणक्षयभोगहिंसासु दोषदर्शनात् पञ्चोपरमा भवन्ति, तद्धेतुकत्वात् तुष्टयोऽपि पञ्च भवन्ति, यथा ० अर्जनोपाया भिक्षाटनादयः क्लेशदाः, अतोऽलं प्रयासैरिति या तुष्टिः सा पारमुच्यते । तथा कथंचिदर्जितस्य चौरादितो रक्षणमपि कष्टमिति कृत्वा या तुष्टिः सा सुपाराख्या । एवं कथंचिद्रक्षितमपि भोगात् क्षयं गमिष्यत्येवेति कृत्वा या तुष्टिः सा पारापारमुच्यते। एवं शब्दादिभोगाभ्यासात् प्रवर्तन्ते(१) कामाः, ते च पुनर्विषयप्राप्तौ ० अप्राप्तौ च कामिनो दुन्वन्तीति कृत्वा या तुष्टिः सा० अनुत्तमाम्भ इत्युच्यते । एवं भोगेऽवश्यं प्राणिहिंसा जायत एवेति दोषदर्शनाद्विषयोपरमे या तुष्टिः सा ० उत्तमाम्भ इत्युच्यते । तदेवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिः पञ्चभिर्नव तुष्टयोऽभिमताः । "अम्भः सलिलं मेघो वृष्टिः पारं तथा सुपारं च । अन्यच्च पारापारमनुत्तमाम्भ उत्तमाम्भश्च" ॥ इति ॥ ५० ॥

---

ऊहः शब्दोऽध्ययनं
दुःखविघातास्त्रयः सुहृत्प्राप्तिः ।
दानं च सिद्धयोऽष्टौ
सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ ५१ ॥

अष्ट सिद्धीराह ० ऊह इति । ऊहो विचारसामर्थ्यम्, विशेषदर्शनमिति यावत् । शब्दः क्रियाकारकभावापन्नपदसमुदायव्युत्पत्तिः ।

(१)—र्धन्ते इति वरः पाठः ।

अध्ययनं गुरुमुखतः शास्त्रार्थज्ञानम् । दुःखविघाता दुःखशमनोपायास्त्रय इति, दुःखानां त्रित्वात् ० शमनोपायानामपि त्रित्वम् । सुहृत्प्राप्तिः ० आध्यात्मिकजनसङ्गः । दानं दैप् शोधने इति धातोर्बाह्याभ्यन्तरशौचम् । सिध्यत्यनयेति सिद्धिः । तत्र दुःखविघातसिद्धिः फलत्वान्मुख्या, अन्यास्तु पञ्च तत्साधनत्वाद् गौण्य इति विवेकः । तत्रोह्यादेः संज्ञाविशेष आकरे (१) यथा "तारतारसुतारप्रमोदमुदितमोदमानरम्यकसदामुदिताख्याः सिद्धय" इति । आसामुपादेयत्वं विपर्ययाशक्तितुष्टीनां तु हेयत्वं ज्ञापयिष्यन्नाह सिद्धेः पूर्वोऽङ्कुशस्त्रिविध इति । पूर्वः पूर्वोक्तो विपर्ययाशक्तितुष्टिरूपस्त्रिविधः सिद्धेरङ्कुशः, कारणविघटनादिद्वारा निवारकः, अतः सिद्धिपरिपन्थित्वादङ्कुश इव, इति विपर्ययाशक्तितुष्टयो हेया एवेति भावः ॥ ५१ ॥

---

न विना भावैर्लिङ्गं
न विना लिङ्गेन भावनिर्वृत्तिः ।
लिङ्गाख्यो भावाख्य-
स्तस्माद् द्विविधः प्रवर्तते सर्गः ॥ ५२ ॥

ननु भोगो विषयमन्तरेण न भवतीत्याकाशादिसर्ग एवास्तु कृतं महदाद्यतीन्द्रियसर्गेण तत्राह न विना भावैरिति । भावैः प्रत्यक्षैर्विषयैर्विना लिङ्गं महदाद्यतीन्द्रियवृन्दं न भोगसाधनमित्यर्थः । लिङ्गेन महदादिना विना भावानां विषयाणां न निर्वृत्तिः ० न भोगसाधनत्वम्, अयमभिप्रायः, नहि विषयः स्वरूपतो भोगहेतुः, सर्वेषां सर्वविषयभोगापत्तेः, अपितु ज्ञात एव, ज्ञानं चेन्द्रियान्तःकरणैर्विना नेत्युभयस्वीकारः, तस्माद् द्वयोरप्यावश्यकत्वात् ० लिङ्गाख्यः ० लिङ्ग्यत एव नतु साक्षात्क्रियत इति लिङ्गं महदाद्यतीन्द्रियवर्गः,

(१) भाष्ये ।



भावाख्यः ० भूयते प्राप्यतेऽर्थादिन्द्रियेणेति विषयवर्गः प्रत्यक्षसिद्धः ॥५२॥

---

अष्टविकल्पो दैव-
स्तैर्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः
समासतो भौतिकः सर्गः ॥ ५३ ॥

भौतिकसर्गविभागमाह ० अष्टविकल्प इति । ब्राह्मप्राजापत्यैन्द्रपित्र्यगान्धर्वयाक्षराक्षसपैशाचभेदादष्टविधो दैव इत्यर्थः । तैर्यग्योन इति, पशुपक्षिसर्पकीटस्थावरभेदात् पञ्चविध इत्यर्थः । मानुष्यश्चैकविधः, समासतः, ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षयेति । भौतिको दैहिकः, तेन घटादिनिरासः, केचित्तु घटादेः स्थावरेऽन्तर्भावं वदन्ति ॥ ५३ ॥

---

ऊर्ध्वं सत्त्वविशाल-
स्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो
ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥

भौतिकस्य विशेषमाह ० ऊर्ध्वमिति । भूलोकादूर्ध्वं सत्त्वविशालः सत्त्वबहुलः, तत्रत्येषु रजस्तमसोः सत्त्वेऽपि सत्त्वाधिक्यश्रवणात् । मूलतोऽधःपतनशीलस्तैर्यग्योनस्तमोविशालस्तमोबहुलः, तेषु सत्त्वरजसोः सत्त्वेऽपि तमस आधिक्योपलब्धेः । मध्ये भूलोके रजोविशालः, सत्त्वतमसोः सत्त्वेऽपि धर्माधर्मप्रवृत्तिपरत्वदर्शनेन रजस आधिक्यकल्पनात् । ब्रह्मादीति, सोऽयं ब्रह्मादिस्तम्बपर्यन्तः सर्गो लोकभेदेनैवंसंस्थितिक इत्यर्थः । स्तम्बः स्थावरः ॥ ५४ ॥

---

तत्र जरामरणकृतं
दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याविनिवृत्ते-
स्तस्माद् दुःखं स्वभावेन ॥ ५५ ॥

तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखतामाह तत्र जरामरणेति । यतः पुरुषः स्वयं चेतनोऽपि तत्र लोकत्रयाख्ये सर्गे जरामरणकृतं दुःखं प्राप्नोति, तस्माद् दुःखं स्वभावेन स्वत एव सर्गो दुःखरूपः, विवेकिनामिति शेषः, यथाह भगवान् पतञ्जलिः, "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन" इति, अत्र परिणामपदेन जरादिदुःखं बोध्यम्, तापपदेन "मा न भूवं हि भूयास"मिति मरणत्रासदुःखं बोध्यम्, संस्कारपदेन पुनर्जननादिदुःखं बोध्यम् । कियन्तं कालं दुःखं प्राप्नोति तदाह लिङ्गस्याविनिवृत्तेः, यावल्लिङ्गं महदादि न निवर्तते तावत्, ज्ञानेन लिङ्गस्य निवृत्तौ तु मोक्षमधिगच्छतीति भावः ॥ ५५ ॥

---

इत्येष प्रकृतिकृतो
महदादिविशेषभूतपर्यन्तः ।
प्रतिपुरुषविमोक्षार्थं
स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

सर्गस्य प्रकृतिमात्रारब्धत्वं वक्तुमुपसंहरति० इत्येष इति । इतीत्युपसंहारे, एष महदादिविशेषभूतपर्यन्तः प्रकृतिकृतः प्रकृत्यैवोक्तरीत्या कृतः, नेश्वरेण न वाऽदृष्टेनेत्यर्थः, विशेषभूतं पृथिवी, अयमभिसंधिः, धर्मसापेक्षत्वनिरपेक्षत्वविकल्पग्राहग्रस्तत्वान्मानाभावाच्च नेश्वरः कारणम्, नाप्यदृष्टम्, कार्यस्य कारणत्वायोगात्, प्रलयकालीनानारम्भकपरमाण्वादिक्रियादौ व्यभिचारेण कार्यमात्रेऽदृष्टा-



दीनामकारणत्वाच्चेति दिक्, अचेतनत्वेन स्वप्रयोजनाभावात्, एष आरम्भः परार्थं एव । ननु कस्यार्थं आरम्भस्तत्राह प्रतिपुरुषेति, प्रत्येकपुरुषस्येत्यर्थः, अत्र भोजयितुमिति विहाय विमोक्षार्थमित्युक्तिस्तु एकस्य मोक्षेऽपि सर्गस्य नाशो नास्ति सर्वसाधारणत्वादिति ज्ञापनाय, अत एव प्रतिपुरुषेत्युक्तम्, आह चैवं समानतन्त्रे भगवान् पतञ्जलिः, "तदर्थ एव दृश्यस्यात्मा कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वा"दिति । परार्थारम्भे न कोऽपि विवाद इत्याह स्वार्थ इवेति । यथान्यो जनः स्वार्थं प्रवर्तते तथैवास्य परार्थ आरम्भो घटत एव, प्रयोजनवत्त्वमात्रस्य प्रवृत्तिमूलत्वादित्यास्तां विस्तरः ॥ ५६ ॥

---

वत्सविवृद्धिनिमित्तं
क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं
तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

नन्वचेतनायाः प्रकृतेः कथं प्रवृत्तिस्तत्राह वत्सेति । अन्वयव्यतिरेकाभ्यां वत्सविवृद्ध्यादिप्रयोजनेनैवाचेतनस्य क्षीरादेः प्रवृत्तिदर्शनात् प्रवृत्तिर्न चेतननियता किंतूद्बुद्धादृष्टमात्रसाध्या, अतस्तद्वदेवाचेतनाया अपि प्रकृतेः पुरुषविमोक्षार्थं प्रवृत्तौ न किंचिद्बाधकमिति भावः, न च क्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबन्धनतया प्रवृत्तेश्चेतननियतत्वमव्याहतमेव तथा च कथमिति वाच्यम्, ईश्वरे प्रमाणाभावात्, प्रामाणिकत्वेऽप्याप्तकामस्य प्रयोजनं विना प्रवर्तकत्वायोगात्, न च कारुण्यादिति वाच्यम्, सर्गात् प्राग् जीवानां दुःखित्वासंभवेन दुःखनिवृत्तीच्छारूपकारुण्यस्यापि तस्मिन्नसंभवात्, तस्मात् स्वयमचेतनापि प्रयोजनेनैव क्षीरादिवत् प्रवर्तत इति सिद्धम् ॥ ५७ ॥

---

औत्सुक्यनिवृत्त्यर्थं
यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं
प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥

ननु प्रयोजनमुद्दिश्यैव प्रवृत्तिर्दृष्टा न चास्यास्तदस्ति तत्राह ० औत्सुक्येति । औत्सुक्यमिच्छा यथेयं मया संभोक्तव्येति, तन्निवृत्त्यर्थं रत्यादिक्रियासु प्रवर्तते लौकिकः, अनिवृत्ताया इच्छाया दुःखदत्वात्, सा च विषयसिद्धावेव निवर्तत इति सैव फलम्, एवमव्यक्तं प्रधानमपि पुरुषार्थो मया कर्तव्य इतीच्छायां पुरुषविमोक्षरूपफलार्थं प्रवर्तते, तत्सिद्धिं विना तादृशेच्छाया अनिवृत्तेः, अनिवृत्तायाश्चानिष्टत्वात्, तथा च स्वार्थमुखेनैव परार्थारम्भ इति न कोऽपि दोष इत्यास्तां विस्तरः ॥ ५८ ॥

---

रङ्गस्य दर्शयित्वा
निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं
प्रकाश्य विनिवर्तते प्रकृतिः ॥ ५९ ॥

ननु भवतु प्रवृत्तिः प्रकृतेर्निवृत्तिस्तु कथम्, तथा च पुरुषस्यानिर्मोक्ष एव स्यादत आह रङ्गस्येति । रङ्गपदं स्थानिपरम्, तथा च यथा नर्तकी सुप्रीता हावभावलीलाविलासवती विविधालंकारशोभिता नृत्यगीतादिभिरात्मानं रङ्गस्थस्य सभ्यादेर्दर्शयित्वा दृष्टाहमनेनेति कृतप्रयोजना धनप्राप्त्या निवर्तते, एवं प्रकृतिर्बुद्ध्यादिसुखदुःखान्तभावेनात्मानं पुरुषस्य प्रकाश्य त्वमन्योऽहमन्येति विवेकतो निवर्तते ० असंयुक्ता भवति, तथानिवृत्तिकः पुरुषो मोक्षमधिगच्छति ॥ ५९ ॥

---



नानाविधैरुपायै-
रुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सत-
स्तस्यार्थमपार्थकं चरति ॥ ६० ॥

ननु परार्थं प्रत्युपकारसंबन्धेन प्रवृत्तिर्दृश्यते, नहि पुरुषात् कश्चित् प्रत्युपकारः प्रकृतेरत आह नानाविधैरिति । गुणवती प्रकृतिरत एवोपकारिणी पुंसः पुरुषस्य द्रष्टुरगुणस्य सच्चित्स्वभावकतया गुणातीतस्यात एवानुपकारिण उपकारासमर्थस्य नानाविधैर्महदहंकारेन्द्रियमनःप्रभृतिभिरुपायैरर्थं प्रयोजनमपार्थकं स्वीयप्रयोजनशून्यमेव चरति ० आचरति, स्वभाव एवायं गुणवतां यदनुपकारिण्यप्युपकारकरणम्, अतः परार्थं प्रत्युपकारसंबन्धेनैव प्रवृत्तिरिति न नियमोऽव्यभिचारादित्यास्तां विस्तरः ॥ ६० ॥

---

प्रकृतेः सुकुमारतरं
न किंचिदस्तीति मे मतिर्भवति ।
या दृष्टास्मीति पुन-
र्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥

स्यादेतत्, नर्तकी नृत्यं सभ्येभ्यो दर्शयित्वा धनप्राप्त्या निवृत्तापि पुनः कुतूहलात् प्रवर्तते यथा, तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा विवेकेन निवृत्तापि पुनः प्रवर्त्स्यतीत्यत आह प्रकृतेरिति । सुकुमारतरं सलज्जम् । दृष्टास्मीति कृत्वा पुनः पुरुषस्य दर्शनं नोपैति दृष्टिविषया (१) न भवति, यथा कदाचित् कुलस्त्री युवती साध्वी द्वारावस्थितपुरुषेण रहसि वा गतेन दृष्टा सा व्रीडायमाना त्वरितमन्तः प्रविशति, दृष्टाहमनेनेत्येवमवबुध्य न दर्शनमुपैत्यन्यपुरु-

(१) विषयभूता इत्युचितम् ।

पस्य, एवं प्रकृतिः परात्मना पुरुषेण यदा ज्ञानचक्षुषा दृष्टा सा व्रीडायमाना (१)कुलस्त्रीवत् पुनर्दर्शनं नोपैति पुरुषस्य, विवेकख्यातेरेव तत्प्रवृत्तिप्रतिबन्धकत्वादिति भावः ॥ ६१ ॥

---

तस्मान्न बध्यते ना-
पि (२) मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मु-
च्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥

स्यादेतत् पुरुषश्चेद्गुणोऽपरिणामी कथमस्य सुखदुःखादिरूपो बन्धः, अतो न मोक्षोऽपि, मोक्षस्य बन्धेन समानाधिकरणत्वात्, तस्मात् पुरुषविमोक्षार्थमिति रिक्तं वचः, इतीमामाशङ्कामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति तस्मादिति। वस्तुतोऽसङ्गत्वादेव पुरुषो बन्धमोक्षादिरहितोऽस्ति, "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ इति" श्रुतेरिति भावः। कस्तर्हि बन्धादिमानित्यत आह संसरतीति। प्रकृतिरेव नानापुरुषाश्रया बुद्ध्यादिद्वारा तादृशी, तथा च बन्धादिकं बुद्धिनिष्ठमेव पुरुषे तत्संपर्कात् तद्गतमारोप्यत एव केवलं नतु तदप्यस्तीति भावः ॥ ६२ ॥

---

रूपैः सप्तभिरेव तु
बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति
विमोचयत्येकरूपेण ॥ ६३ ॥

(१) व्रीडामयमाना ० इति योग्यः पाठः।

(२) ऽद्धा न इति पा०।



ननु पुरुषस्यापि प्रकृतिसंपर्कादारोपितसुखदुःखादिकं बन्ध इत्युक्तम्, सा पुनः केन साधनेन बध्नाति मोचयति वा तदाह रूपैरिति। पुरुषार्थं भोगं प्रति ० आत्मना बुद्धिरूपेण ० आत्मानं पुरुषं रूपैः सप्तभिः धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यैकैर्बध्नाति, पुरुषार्थं स्वरूपावस्थानलक्षणं मोक्षं प्रति ० एकेन रूपेण ज्ञानेन मोचयति, संसारान्निवर्तयति, एतेन वैराग्योपरत्याद्यभावेऽपि ज्ञानं मोक्षस्य कारणं भवत्येवेति ज्ञापितम्, उक्तं च तथा वेदान्तेषु, "पूर्णबोधे तद्न्यौ द्वौ प्रतिबद्धौ यदा तदा। मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति" ॥ इति, द्वौ वैराग्योपरमौ, दृष्टदुःखं यथोचितव्यवहारक्लेशः, तथा च विषयजिहासारूपवैराग्यस्य विषयदोषदर्शनजन्यस्य पुनर्भोगेष्वदीनतामात्रं फलं नतु मोक्षोऽपि, एवं धीनिरोधरूपोपरमस्यापि यमादिसाध्यस्य द्वैतादर्शनमेव फलं न मोक्षः, श्रुतिषु ज्ञानैकलभ्यत्वकथनादित्यास्तां विस्तरः ॥ ६३ ॥

---

एवं तत्त्वाभ्यासा-
न्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं
केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

भवतु ज्ञानादेव कैवल्यं तदेव तु कस्मात् किमाकारं च तदाह ० एवमिति। उक्तप्रकारपुरुषगोचराभ्यासात् पुनः पुनश्चिन्तनरूपान्निदिध्यासनादेव केवलं पुरुषमात्रगोचरं ज्ञानं साक्षात्कार उत्पद्यत इत्यर्थः, एतेन निदिध्यासनसहकृतेन मनसैवात्मगोचरनिर्विकल्पकसाक्षात्कारो भवति न श्रुतानुमानाभ्याम्, तयोस्तत्रासामर्थ्यादिति बोधितम्, यथाह समानतन्त्रे भगवान् पतञ्जलिः, "ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वा"दिति। आका-

रमाह नास्मीत्यादिना। अस्मीत्यस्य न कर्तास्मीत्यर्थः, तेन बुद्धिभिन्नोऽहमिति प्राप्तम्, न मे, दुःखमिति शेषः, तेन दुःखाद्यारोपाभावो लब्धः, नाहमित्यनेनाहंकारभेदग्रहः, नास्ति परिशेषो यस्मादित्यपरिशेषं चरमम्, "तस्य सप्तधा प्रान्तभूमौ प्रज्ञे"त्यादिना योगसूत्रेणोक्तम्। अविपर्ययात् ॰ व्यधिकरणप्रकाराभावाद्विशुद्धं प्रमात्मकं मिथ्याज्ञानवासनोन्मूलनक्षमम्, एवंविध एकात्मसाक्षात्कारस्तत्त्वज्ञानपदेनोच्यत इति भावः ॥ ६४ ॥

---

तेन निवृत्तप्रसवा-
मर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः
प्रेक्षकवदवस्थितः स्वस्थः ॥ ६५ ॥

तत्त्वज्ञानानन्तरं पुरुषः किं करोति तदाह तेनेति। तेन पूर्वोक्तेन ज्ञानेन निवृत्तप्रसवाम्, प्रसवा भोगभेदसाक्षात्कारादयः, तेषां जनितत्वान्निवृत्तां प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः, यथा कश्चित् प्रेक्षको रङ्गस्थो गीतनृत्यादिषु वर्तमानां नर्तकीं स्वस्थो निर्विकल्पो निराकुलः पश्यति, एवं पुरुषोऽपि तासु तासु योन्यवस्थासु वर्तमानां प्रकृतिं पश्यति, इयं प्रकृतिः स्वगुणैः पुरुषान् बध्नाति मोचयति च ॥ ६५ ॥

---

दृष्टा मयेत्युपेक्षक
एको दृष्टाहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः
प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

ननु नित्ययोः प्रकृतिपुरुषयोः संयोगसत्त्वात् कथं तस्याः प्रसव-



निवृत्तिस्तत्राह दृष्टा मयेति। तयोः संयोगेऽपि सर्गस्य जनने प्रयोजनं प्रयुज्यतेऽनेनेति व्युत्पत्त्या सहकारि कारणं नास्तीति, तयोर्मध्ये ॰ अन्या प्रकृतिः ॰ उपरमति न प्रसूत इत्यन्वयः। तत् कथं नास्ति तदाह दृष्टा मयेति। तयोर्मध्ये एकः पुरुषः स्वभिन्नेयं स्वसंपर्काद्भातीत्येवंगुणा प्रकृतिर्मया दृष्टेत्युपेक्षको भवत्युपरमते, तद्भोगाद्यावेशरहितो भवति, यथा नर्तकीं दृष्ट्वा सभ्यः, तथा च प्रसवे पुरुषस्य प्रकृतिभेदाग्रहः सहकारी दर्शने सति तु स नास्तीति भावः ॥ ६६ ॥

---

सम्यग्ज्ञानाधिगमाद्
धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशा-
च्चक्रभ्रमिवद्धृतशरीरः ॥ ६७ ॥

ननु "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" ॥ इत्यादिश्रुत्या तत्त्वज्ञानानन्तरमेव मोक्षे सर्वकर्मक्षयेण देहाद्यभावसूचनात् कथं प्रकृतिदर्शनं ज्ञाने देहस्य हेतुत्वात्, तत्राह सम्यगिति। सम्यग्ज्ञानं मिथ्याज्ञानोच्छेदक्षमं ज्ञानम्, तदधिगमात् तदुत्पत्तेर्धर्मादीनां देहारम्भकान्यधर्मादीनां संचितक्रियमाणानां दग्धबीजभावानाम्, अकारणं स्वाश्रये स्वफलोत्पादनासामर्थ्यम्, तस्योक्तप्रमाणाद्विवक्षितविवेकेन प्राप्तौ, संस्कारो देहारम्भकादृष्टम्, तद्वशाद्धृतशरीरस्तिष्ठति, यथा कुलालव्यापारविगमेऽपि वेगवशाच्चक्रभ्रमिस्तिष्ठति, प्रारब्धस्य भोगैकनाश्यत्वात्, अत एव "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य" इत्युक्तं श्रुतौ, भोगेन त्वितरे क्षपयित्वे"ति वेदान्तेषु भगवता व्यासेन च, तथा च तत्त्वज्ञाने सति कर्मक्षय इत्यस्य प्रथमं तत्त्वज्ञानप्रागभावस्य नष्टत्वात् फलानुत्पादमात्रमर्थो न देहाद्यभावोऽपीति संक्षेपः ॥ ६७ ॥

प्राप्ते शरीरभेदे
चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिक-
मुभयं कैवल्यमाप्नोति॥ ६८॥

ननु यद्युत्पन्नतत्त्वज्ञानोऽपि तिष्ठति कदा तर्हि मोक्षं गच्छति तत्राह प्राप्त इति। भोगेन प्रारब्धक्षयतः शरीरस्य भेदो विनाशस्तस्मिन् प्राप्ते सति चरितार्थत्वाद् बुद्धितत्त्वादिद्वारा कृतभोगापवर्गलक्षणप्रयोजनकत्वात् प्रधानस्य पुरुषं प्रति विनिवृत्तौ संयोगाभावलक्षणलये (१) उभयम्॰ उभयगुणकं कैवल्यं दुःखविनाशं प्राप्नोति, द्वयं किं तदाह॰ ऐकान्तिकम्॰ अवश्यंभावि॰ आत्यन्तिकं पुनर्दुःखजातीयानुत्पत्तिविशिष्टम्॰ एतद्विशेषणकत्वात् कैवल्यमुभयम्, उत्पन्नात्मसाक्षात्कारवान् पुरुषः प्रक्षीणाशेषकल्मषो भोगेन प्रारब्धक्षये सत्यवश्यमात्यन्तिकदुःखविनाशं प्राप्नोतीति समुदायार्थः॥ ६८॥

---

पुरुषार्थं ज्ञानमिदं
गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलया-
श्चिन्त्यन्ते यत्र (२) भूतानाम्॥ ६९॥

प्रेक्षावद्विश्वासार्थमाह पुरुषार्थमिति। पुरुषस्यार्थः प्रयोजनं मोक्षाख्यं यस्मात् तादृशं ज्ञानं गुह्यं बहूनां दुरवबोधं परमर्षिणा कपिलेन कथितम्, यत्रेति निमित्तसप्तमी, यज्ज्ञाननिमित्तमित्यर्थः॥६९॥

---

एतत् पवित्रमग्र्यं

(१) शरीरलये इत्यर्थः।
(२) ज्ञाने।



मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय
तेन च बहुधा कृतं तन्त्रम्॥ ७०॥

एतद् भगवता यत् तत्त्वज्ञानमुक्तं तस्य कुत आगमस्तत्राह॰ एतदिति। पवित्रं पावनं सर्वपापनाशकत्वात्, अग्र्यं सर्वेभ्यः पवित्रेभ्यो मुख्यम्, मुनिः कपिलः, आसुरये॰ अनुकम्पया प्रददौ कथितवान्, स पुनः पञ्चशिखाय व्याख्यातवान्, तेन बहुधा शिष्योपदेशद्वारा प्रकाशितमित्यर्थः॥ ७०॥

---

शिष्यपरंपरयागत-
मीश्वरकृष्णेन चैतदार्याभिः।
संक्षिप्तमार्यमतिना
सम्यग् विज्ञाय सिद्धान्तम् (१)॥ ७१॥

ईश्वरकृष्णेन किं ततः साक्षात् प्राप्तं तत्राह शिष्यपरंपरयेति। आर्याख्यं छन्दोविशेषस्तद्विशिष्टं पद्यमाप्यार्येत्युच्यते, अत उक्तमार्याभिरिति, किं कृत्वा सम्यगध्ययनभावनाभ्यां सिद्धान्तं विज्ञाय॥ ७१॥

---

सप्तत्यां किल येऽर्था-
स्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः
परवादविवर्जिताश्चापि॥ ७२॥

इति सांख्यकारिकाग्रन्थः समाप्तः
शुभम्॥

(१) राद्धान्तम् इति पा०।

एतच्च शास्त्रार्थसूचनाच्छास्त्रं नतु प्रकरणमित्याह समत्यामिति । षष्टितन्त्रस्य पुरुषप्रकृत्यादिषष्टिपदार्थव्युत्पादकतन्त्रस्य येऽर्थाः किल सप्तत्यां कारिकासप्तत्यां कथिताः, किंभूताः, आख्यायिकाविरहिताः कथातद्घटितदृष्टान्तादिरहिताः, तथा परवादविवर्जिताश्च, षड्दर्शनोत्थापनरहिताश्चेत्यर्थः, तत्र यथा कपिलोक्तषडध्याय्यां चतुर्थोऽध्याये आख्यायिका, पञ्चमे परवादः, तथात्र न वर्तत इति भावः, षष्टिपदार्था गणिता ग्रन्थान्तरे यथा "पुरुषः प्रकृतिर्बुद्धिरहंकारो गुणास्त्रयः । तन्मात्रमिन्द्रियं भूतं मौलिकार्थाः स्मृता दश ॥ विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः । करणानामसामर्थ्यमष्टाविंशतिधा मतम् ॥ इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिः" । इति, तथा चात्रैतत्षष्टिपदार्थविवेचनान्नेदं प्रकरणं किंतु तन्त्रमेवेति सिद्धम् ॥ ७२ ॥

इति श्रीरामगोविन्दतीर्थशिष्यनारायणतीर्थकृता सांख्यचन्द्रिका संपूर्णतामगमत् ॥ शुभमस्तु ॥

# गौडपादविरचितं

## सांख्यकारिकाभाष्यम् ।

श्रीगणेशाय नमः ।

कपिलाय नमस्तस्मै, येनाविद्योदधौ जगति मग्ने ।
कारुण्यात् सांख्यमयी, नौरिव विहिता प्रतरणाय ॥ १ ॥
अल्पग्रन्थं स्पष्टं, प्रमाणसिद्धान्तहेतुभिर्युक्तम् ।
शास्त्रं शिष्यहिताय, समासतोऽहं प्रवक्ष्यामि ॥ २ ॥

दुःखत्रयेति । अस्या आर्याया उपोद्घातः क्रियते । इह भगवान् ब्रह्मसुतः कपिलो नाम तद्यथा, "सनकश्च सनन्दनश्च (१) तृतीयश्च सनातनः । आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ॥ इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षयः" । कपिलस्य सहोत्पन्नानि धर्मो ज्ञानं वैराग्यमैश्वर्यं चेति । एवं स उत्पन्नः सन्नन्धे तमसि मज्जज्जगदालोक्य संसारपारम्पर्येण सत्कारुण्यो जिज्ञासमानाय ० आसुरिसगोत्राय ब्राह्मणायेदं पञ्चविंशतितत्त्वानां ज्ञानमुक्तवान्, यस्य ज्ञानाद्दुःखक्षयो भवति, "पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः"॥ तदिदमाहुः, दुःखत्रयाभिघाताज्जिज्ञासेति । तत्र दुःखत्रयम्, आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं चेति । तत्राध्यात्मिकं द्विविधं शारीरं मानसं चेति । शारीरं वातपित्तश्लेष्मविपर्ययकृतं ज्वरातीसारादि, मानसं प्रियवियोगाप्रियसंयोगादि । आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते ।

(१) सनन्दश्चेति पाठान्तरम् ।

आधिदैविकम्, देवानामिदं दैवम्, दिवः प्रभवतीति वा दैवम्, तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम् । एवं यथा दुःखत्रयाभिघाताज्जिज्ञासा कार्या क्व, तदभिघातके हेतौ, तस्य दुःखत्रयस्याभिघातको योऽसौ हेतुस्तत्रेति । दृष्टे सापार्था चेत्, दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञासाऽपार्था चेद्यदि । तत्राध्यात्मिकस्य द्विविधस्याप्यायुर्वेदशास्त्रक्रियया प्रियसमागमाप्रियपरिहारकटुतिक्तकषायादिभिर्दृष्ट एवाध्यात्मिकोपायः । आधिभौतिकस्य रक्षादिनाऽभिघातः । दृष्टे साऽपार्था चेदेवं मन्यसे, न, एकान्तात्यन्ततोऽभावात्, यत एकान्ततोऽवश्यमत्यन्ततो नित्यं दृष्टेन हेतुनाभिघातो न भवति, तस्मादन्यत्रैकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विविदिषा कार्येति ॥ १ ॥

यदि दृष्टान्यत्र जिज्ञासा कार्या, ततोऽपि नैव । यत आनुश्रविको हेतुर्दुःखत्रयाभिघातकः । अनुश्रूयत इत्यनुश्रवस्तत्र भव आनुश्रविकः स चागमात् सिद्धः, यथा "अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् किं नूनमस्मांस्तृणवदरातिः किमु धूर्तिरमृतमर्त्यस्य" । कदाचिदिन्द्रादीनां देवानां कल्प आसीत्, कथं वयममृता अभूमेति विचार्य यस्मादयमपाम सोमं पीतवन्तः सोमं तस्मादमृता अभूम अमरा भूतवन्त इत्यर्थः, किंच, अगन्म ज्योतिः, गतवन्तो लब्धवन्तो ज्योतिः स्वर्गमिति, अविदाम देवान्, दिव्यान् विदितवन्तः, एवंच किं नूनमस्मांस्तृणवदरातिः, नूनं निश्चितं किमरातिः शत्रुरस्मान् तृणवत् करोति, किमु धूर्तिरमृतमर्त्यस्य, धूर्तिर्जरा हिंसा वा किं करिष्यति० अमृतमर्त्यस्य । अन्यच्च वेदे श्रूयते आत्यन्तिकं फलं पशुबधेन "सर्वांल्लोकाञ्जयति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां तरति यो योऽश्वमेधेन यजत" इति । ऐकान्तात्यन्तिके एवं वेदोक्ते० अपार्थैव जिज्ञासा, इति न । उच्यते । दृष्टवदानुश्रविक इति । दृष्टेन तुल्यो दृष्टवत् । योऽसावानुश्रविकः



कस्मात् स दृष्टवत् यस्मादविशुद्धिक्षयातिशययुक्तः । अविशुद्धियुक्तः पशुघातात्, तथा चोक्तम्, "षट् शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः" ॥ इति । यद्यपि श्रुतिस्मृतिविहितो धर्मस्तथापि मिश्रीभावादविशुद्धियुक्त इति । तथा, "बहूनीन्द्रसहस्राणि देवानां च युगे युगे । कालेन समतीतानि कालो हि दुरतिक्रमः" ॥ इति । एवमिन्द्रादिनाशात् क्षययुक्तः । तथाऽतिशयो विशेषस्तेन युक्तः । विशेषगुणदर्शनादितरस्य दुःखं स्यादिति । एवमानुश्रविकोऽपि हेतुर्दृष्टवत् । कस्तर्हि श्रेयानिति चेत् । उच्यते । तद्विपरीतः श्रेयान्, ताभ्यां दृष्टानुश्रविकाभ्यां विपरीतः श्रेयान् प्रशस्यतर इति, अविशुद्धिक्षयातिशयायुक्तत्वात् । स कथमित्याह व्यक्ताव्यक्तज्ञविज्ञानात् । तत्र व्यक्तं महदादि, बुद्धिरहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि । अव्यक्तं प्रधानम् । ज्ञः पुरुषः । एवमेतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञाः कथ्यन्ते । एतद्विज्ञानाच्छ्रेय इति । उक्तं च "पञ्चविंशतितत्त्वज्ञ" इत्यादि ॥ २ ॥

अथ व्यक्ताव्यक्तज्ञानां को विशेष इत्युच्यते । मूलप्रकृतिः प्रधानम्, प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात् । मूलं च सा प्रकृतिश्च मूलप्रकृतिः, अविकृतिः, अन्यस्मान्नोत्पद्यते, तेन प्रकृतिः कस्य चिद्विकारो न भवति । महदाद्याः प्रकृतिविकृतयः सप्त । महान् बुद्धिः, बुद्ध्याद्याः सप्त, बुद्धिः १ अहङ्कारः २ पञ्च तन्मात्राणि ५ एताः सप्त प्रकृतिविकृतयः, तद्यथा, प्रधानाद्बुद्धिरुत्पद्यते तेन विकृतिः प्रधानस्य विकार इति, सैवाहङ्कारमुत्पादयति, अतः प्रकृतिः, अहंकारोऽपि बुद्धेरुत्पद्यत इति विकृतिः, स च पञ्च तन्मात्राण्युत्पादयतीति प्रकृतिः, तत्र शब्दतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तस्मादाकाशमुत्पद्यत इति प्रकृतिः, तथा स्पर्शतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवं वायुमुत्पादयतीति प्रकृतिः, गन्धतन्मात्रमहंकारादुत्प-

द्यत इति विकृतिस्तदेवं पृथिवीमुत्पादयतीति प्रकृतिः, रूपतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवं तेज उत्पादयतीति प्रकृतिः, रसतन्मात्रमहंकारादुत्पद्यत इति विकृतिस्तदेवमप उत्पादयतीति प्रकृतिः, एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च । षोडशकस्तु विकारः, पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाण्येकादशं मनः पञ्च महाभूतान्येष षोडशको गणो विकृतिरेव, विकारो विकृतिः । न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति । इह लोके प्रमेयवस्तु प्रमाणेन साध्यते यथा प्रस्थादिभिर्व्रीहयस्तुलया चन्दनादि । तस्मात् प्रमाणमभिधेयम् ।

दृष्टं यथा श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि, शब्दस्पर्शरूपरसगन्धा एषां पञ्चानां पञ्चैव विषया यथासंख्यम् । शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शं, चक्षू रूपं, जिह्वा रसं, घ्राणं गन्धमिति । एतद्दृष्टमित्युच्यते प्रमाणम् । प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनाद् ग्राह्यः, यथेन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गेऽप्सरसः, इत्यादि । प्रत्यक्षानुमानाग्राह्यमप्याप्तवचनाद्गृह्यते । अपिचोक्तम् । "आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः । क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात् ॥ स्वकर्मण्यभियुक्तो यः सङ्गद्वेषविवर्जितः । पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः" ॥ एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति । षट् प्रमाणानि जैमिनिः । अथ कानि तानि प्रमाणानि । अर्थापत्तिः संभवः० अभावः प्रतिभा० ऐतिह्यम्० उपमानं चेति षट् प्रमाणानि । तत्रार्थापत्तिर्द्विविधा, दृष्टा श्रुता च । तत्र दृष्टा, एकस्मिन् पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नप्यात्मभावो गृह्यत एव । श्रुता यथा दिवा देवदत्तो न भुङ्क्ते० अथ च पीनो दृश्यते० अतोऽवगम्यते रात्रौ भुङ्क्त इति । संभ-



वो यथा प्रस्थ इत्युक्ते चत्वारः कुडवाः संभाव्यन्ते । अभावो नाम प्रागितरेतरात्यन्तसर्वाभावलक्षणः । प्रागभावो यथा देवदत्तः कौमारयौवनादिषु । इतरेतराभावः पटे घटाभावः । अत्यन्ताभावः खरविषाणवन्ध्यासुतखपुष्पवदिति । सर्वाभावः प्रध्वंसाभावो दग्धपटवदिति, यथा शुष्कधान्यदर्शनाद्वृष्टेरभावोऽवगम्यते । एवमभावोऽनेकधा । प्रतिभा यथा, "दक्षिणेन च विन्ध्यस्य सह्यस्य च यदुत्तरम् । पृथिव्यामासमुद्रायां स प्रदेशो मनोरमः" ॥ एवमुक्ते तस्मिन् प्रदेशे शोभना गुणाः सन्तीति प्रतिभोत्पद्यते प्रतिभा च जानतां ज्ञानमिति । ऐतिह्यं यथा, ब्रवीति लोको यथात्र वटे यक्षिणी प्रवसतीत्येवैतिह्यम् । उपमानं यथा, गौरिव गवयः समुद्र इव तडागः । एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि । तत्रानुमाने तावदर्थापत्तिरन्तर्भूता । संभवाभावप्रतिभैतिह्योपमाश्चाप्तवचने । तस्मात् त्रिष्वेव सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं तदाह । तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धिर्भवतीति वाक्यशेषः । प्रमेयसिद्धिः प्रमाणाद्धि । प्रमेयं प्रधानं बुद्धिरहंकारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति । एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते । तत्र किंचित् प्रत्यक्षेण साध्यं किंचिदनुमानेन किंचिदागमेनेति त्रिविधं प्रमाणमुक्तम् ॥ ४ ॥

तस्य किं लक्षणमेतदाह । प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेष्वध्यवसायो दृष्टम्, प्रत्यक्षमित्यर्थः । त्रिविधमनुमानमाख्यातम्, पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति । पूर्वमस्यास्तीति पूर्ववद्, यथा मेघोन्नत्या वृष्टिं साधयति पूर्वदृष्टत्वात्, शेषवद्यथा समुद्रोदकं जलपलं लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति, सामान्यतोदृष्टम्, देशान्तराद्देशान्तरं प्राप्तं दृष्टम्, गतिमच्चन्द्रतारकं चैत्रवत्, यथा चैत्रनामानं देशान्तराद्देशान्तरं प्राप्तमवलोक्य गतिमानयमिति, तद्वच्चन्द्रतारकमिति, तथा पुष्पिताम्रदर्शनादन्यत्र पुष्पि-

ता आप्ता इति सामान्यतोदृष्टेन साधयति, एतत् सामान्यतोदृष्टम्। किंच तल्लिङ्गलिङ्गिपूर्वकमिति, तदनुमानं लिङ्गपूर्वकम्, यत्र लिङ्गेन लिङ्गी० अनुमीयते यथा दण्डेन यतिः। लिङ्गिपूर्वकं च, यत्र लिङ्गिना लिङ्गमनुमीयते यथा दृष्ट्वा यतिमस्येदं त्रिदण्डमिति। आप्तश्रुतिराप्तवचनं च, आप्ता आचार्या ब्रह्मादयः, श्रुतिर्वेदः, आप्ताश्च श्रुतिश्च आप्तश्रुतिः (१) तदुक्तमाप्तवचनमिति। एवं त्रिविधं प्रमाणमुक्तम् ॥ ५ ॥

तत्र केन प्रमाणेन किं साध्यमुच्यते। सामान्यतोदृष्टादनुमानादतीन्द्रियाणामिन्द्रियाण्यतीत्य वर्तमानानां सिद्धिः। प्रधानपुरुषावतीन्द्रियौ सामान्यतोदृष्टेनानुमानेन साध्येते यस्मान्महदादि लिङ्गं त्रिगुणम्, यस्येदं त्रिगुणं कार्यं तत् प्रधानमिति। यतश्चाचेतनं चेतनमिवाभाति० अतोऽन्योऽधिष्ठाता पुरुष इति। व्यक्तम्, प्रत्यक्षसाध्यम्। तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्, यथेन्द्रो देवराज उत्तराः कुरवः स्वर्गेऽप्सरस इति परोक्षमाप्तवचनात् सिद्धम् ॥ ६ ॥

अत्र कश्चिदाह प्रधानं पुरुषो वा नोपलभ्यते यच्च नोपलभ्यते लोके तन्नास्ति तस्मात् तावपि न स्तः। यथा द्वितीयं शिरस्तृतीयो बाहुरिति। तदुच्यते। अत्र सतामप्यर्थानामष्टधोपलब्धिर्न भवति। तद्यथा। इह सतामप्यर्थानामतिदूरादनुपलब्धिर्दृष्टा यथा देशान्तरस्थानां चैत्रमैत्रविष्णुमित्राणाम्। सामीप्याद्यथा चक्षुषोऽञ्जनानुपलब्धिः। इन्द्रियाभिघाताद्यथा बधिरान्धयोः शब्दरूपानुपलब्धिः। मनोऽनवस्थानाद्यथा व्यग्रचित्तः सम्यक्कथितमपि नावधारयति। सौक्ष्म्याद्यथा धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते। व्यवधानाद्यथा कुड्येन पिहितं वस्तु नोपलभ्यते। अभिभवाद्यथा सूर्यतेजसाभिभूता ग्रहनक्षत्रतारकादयो नोपलभ्यन्ते। समानाभिहाराद्यथा मुद्गराशौ मुद्गः क्षिप्तः कुवलयामलकमध्ये कुवलयामलके

(१) आर्षत्वादेकवचनम्, मध्ये सहितशब्दलोपो वेत्यादि।

what is admitted in regard to . .



क्षिप्ते कपोतमध्ये कपोतो नोपलभ्यते प्रधानद्रव्यमध्याहृतत्वात्। एवमष्टधानुपलब्धिः सतामर्थानामिह दृष्टा ॥ ७ ॥

एवं चास्ति किमभ्युपगम्यते प्रधानपुरुषयोरप्येतयोर्वानुपलब्धिः केन हेतुना केन चोपलब्धिस्तदुच्यते। सौक्ष्म्यात् तदनुपलब्धिः, प्रधानस्येत्यर्थः। प्रधानं सौक्ष्म्यान्नोपलभ्यते यथाकाशे धूमोष्मजलनीहारपरमाणवः सन्तोऽपि नोपलभ्यन्ते। कथं तर्हि तदुपलब्धिः। कार्यतस्तदुपलब्धिः। कार्यं दृष्ट्वा कारणमनुमीयते० अस्ति प्रधानं कारणं यस्येदं कार्यम्। बुद्धिरहंकारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतान्येव तत्कार्यम्। तच्च कार्यम्, प्रकृतिविरूपम्, प्रकृतिः प्रधानं तस्य विरूपं प्रकृतेरसदृशम्। सरूपं च, समानरूपं च, यथा लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च। येन हेतुना तुल्यमतुल्यं तदुपरिष्टाद्वक्ष्यामः ॥ ८ ॥

यदिदं महदादि कार्यं तत् किं प्रधाने सदुताहोस्विदसत्, आचार्यविप्रतिपत्तेरयं संशयः। यतोऽत्र सांख्यदर्शने सत् कार्यम्। बौद्धादीनामसत् कार्यम्। यदि सदसन्न भवत्यथासत् सन्न भवतीति विप्रतिषेधस्तत्राह। असदकरणात्, न सदसद्सतोऽकरणं तस्मात् सत् कार्यम्, इह लोकेऽसत्करणं नास्ति यथा सिकताभ्यस्तैलोत्पत्तिः, तस्मात् सतः करणादस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम्, अतः सत् कार्यम्। किंचान्यत्, उपादानग्रहणात्, उपादानं कारणं तस्य ग्रहणात्, इह लोके यो येनार्थी स तदुपादानग्रहणं करोति दध्यर्थी क्षीरस्य न तु जलस्य, तस्मात् सत् कार्यम्। इतश्च, सर्वसंभवाभावात्, सर्वस्य सर्वत्र संभवो नास्ति यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु, तस्मात् सर्वसंभवाभावात् सत् कार्यम्। इतश्च, शक्तस्य शक्यकरणात्, इह कुलालः शक्तो मृद्दण्डचक्रचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति, तस्मात् सत् कार्यम्। इतश्च, कारणभावाच्च सत् कार्यम्, कारणं

यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा यवेभ्यो यवा व्रीहिभ्यो व्रीहयः, यदाऽसत् कार्यं स्यात् ततः कोद्रवेभ्यः शालयः स्युर्न च सन्तीति, तस्मात् सत् कार्यम् । एवं पञ्चभिर्हेतुभिः प्रधाने महदादि लिङ्गमस्ति, तस्मात् सत उत्पत्तिर्नासत इति ॥ ९ ॥

प्रकृतिविरूपं सरूपं च यदुक्तं तत् कथमित्युच्यते । व्यक्तं महदादि कार्यं हेतुमदिति, हेतुरस्यास्ति हेतुमत्, उपादानं हेतुः कारणं निमित्तमिति पर्यायाः, व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुमद्व्यक्तं भूतपर्यन्तम्, हेतुमद्बुद्धितत्त्वं प्रधानेन, हेतुमानहंकारो बुद्ध्या, पञ्च तन्मात्राण्येकादशेन्द्रियाणि हेतुमन्त्यहङ्कारेण, आकाशं शब्दतन्मात्रेण हेतुमत्, वायुः स्पर्शतन्मात्रेण हेतुमान्, तेजो रूपतन्मात्रेण हेतुमत्, आपो रसतन्मात्रेण हेतुमत्यः, पृथिवी गन्धतन्मात्रेण हेतुमती, एवं भूतपर्यन्तं व्यक्तं हेतुमत् । किंचान्यत्, अनित्यम्, यस्मादन्यस्मादुत्पद्यते, यथा मृत्पिण्डादुत्पद्यते घटः स चानित्यः । किंचाव्यापि, असर्वगमित्यर्थः, यथा प्रधानपुरुषौ सर्वगतौ नैवं व्यक्तम् । किंचान्यत्, सक्रियम्, संसारकाले संसरति, त्रयोदशविधेन करणेन संयुक्तं सूक्ष्मं शरीरमाश्रित्य संसरति, तस्मात् सक्रियम् । किंचान्यत्, अनेकम्, बुद्धिरहङ्कारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि चेति । किंचान्यत्, आश्रितम्, स्वकारणमाश्रयते, प्रधानाश्रिता बुद्धिः, बुद्धिमाश्रितोऽहंकारः, अहंकाराश्रितान्येकादशेन्द्रियाणि पञ्च तन्मात्राणि, पञ्चतन्मात्राश्रितानि पञ्च महाभूतानीति । किंच, लिङ्गम्, लययुक्तम्, लयकाले पञ्च महाभूतानि तन्मात्रेषु लीयन्ते तान्येकादशेन्द्रियैः सहाहंकारे स च बुद्धौ सा च प्रधाने लयं यातीति । तथा सावयवम्, अवयवाः शब्दस्पर्शरसरूपगन्धाः, तैः सह । किंच, परतन्त्रम्, नात्मनः प्रभवति, यथा प्रधानतन्त्रा बुद्धिः, बुद्धितन्त्रोऽहंकारः, अहंकारतन्त्राणि तन्मात्राणीन्द्रियाणि च, तन्मात्रतन्त्राणि पञ्च महाभूतानि च । एवं परतन्त्रं परायत्तं व्याख्यातं व्यक्तम् ।



अथोऽव्यक्तं व्याख्यास्यामः । विपरीतमव्यक्तम् । एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तम्, हेतुमद्व्यक्तमुक्तम् । न हि प्रधानात् परं किंचिदस्ति, यतः प्रधानस्यानुत्पत्तिः, तस्मादहेतुमदव्यक्तम् । तथानित्यं च व्यक्तम्, नित्यमव्यक्तमनुत्पाद्यत्वात्, न हि भूतानीव कुतश्चिदुत्पद्यत इत्यव्यक्तं प्रधानम् । किंचाव्यापि व्यक्तम्, व्यापि प्रधानं सर्वगतत्वात् । सक्रियं व्यक्तमक्रियमव्यक्तं सर्वगतत्वादेव । तथाऽनेकं व्यक्तमेकं प्रधानं कारणत्वात्, त्रयाणां लोकानां प्रधानमेकं कारणम्, तस्मादेकं प्रधानम् । तथाश्रितं व्यक्तमनाश्रितमव्यक्तमकार्यत्वात्, न हि प्रधानात् किंचिदस्ति परं यस्य प्रधानं कार्यं स्यात् । तथा व्यक्तं लिङ्गम्, अलिङ्गमव्यक्तं नित्यत्वात्, महदादि लिङ्गं प्रलयकाले परस्परं प्रलीयते नैवं प्रधानम्, तस्मादलिङ्गं प्रधानम् । तथा सावयवं व्यक्तम्, निरवयवमव्यक्तं न हि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति । तथा परतन्त्रं व्यक्तम्, स्वतन्त्रमव्यक्तं प्रभवत्यात्मनः ॥ १० ॥

एवं व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं साधर्म्यमुच्यते यदुक्तं सरूपं च ।

त्रिगुणं व्यक्तं सत्त्वरजस्तमांसि त्रयो गुणा यस्येति । अविवेकि व्यक्तं न विवेकोऽस्यास्तीति, इदं व्यक्तमिमे गुणा इति न विवेकं कर्तुं याति, अयं गौरयमश्व इति यथा, ये गुणास्तद्व्यक्तं यद् व्यक्तं ते च गुणा इति । तथा विषयो व्यक्तम्, भोग्यमित्यर्थः, सर्वपुरुषाणां विषयभूतत्वात् । तथा सामान्यं व्यक्तम्, मूल्यदासीवत् सर्वसाधारणत्वात् । अचेतनं व्यक्तम्, सुखदुःखमोहान् न चेतयतीत्यर्थः । तथा प्रसवधर्मि व्यक्तम्, तद्यथा बुद्धेरहंकारः प्रसूयते तस्मात् पञ्च तन्मात्राणि ० एकादशेन्द्रियाणि च प्रसूयन्ते तन्मात्रेभ्यः पञ्च महाभूतानि । एवमेते व्यक्तधर्माः प्रसवधर्मान्ता उक्ताः, एवमेभिरव्यक्तं सरूपम्, यथा व्यक्तं तथा प्रधानमिति । तत्र त्रिगुणं व्यक्तमव्यक्तमपि त्रिगुणं यस्यैतन्महदादि कार्यं त्रिगुणम्, इह यदात्मकं कारणं तदा-

त्मकं कार्यमिति, यथा कृष्णतन्तुकृतः कृष्ण एव पटो भवति । तथा-
ऽविवेकि व्यक्तम्, प्रधानमपि गुणैर्न भिद्यते, अन्ये गुणा अन्यत् प्र-
धानमेवं विवेक्तुं न याति तदविवेकि प्रधानम् । तथा विषयो व्यक्तं
प्रधानमपि सर्वपुरुषविषयभूतत्वाद्विषय इति । तथा सामान्यं व्यक्तं
प्रधानमपि, सर्वसाधारणत्वात् । तथाऽचेतनं व्यक्तं प्रधानमपि सुख-
दुःखमोहान् न चेतयतीति, कथमनुमीयते, इह ह्यचेतनान्मृत्पिण्डा-
दचेतनो घट उत्पद्यते । तथा प्रसवधर्मि व्यक्तं प्रधानमपि प्रसवधर्मि,
यतः प्रधानाद् बुद्धिरुत्पद्यते । एवं प्रधानमपि व्याख्यातम् । इदानीं
तद्विपरीतस्तथा च पुमानित्येतद्व्याख्यायते । तद्विपरीतस्ताभ्यां व्य-
क्ताव्यक्ताभ्यां विपरीतः पुमान्, तद्यथा त्रिगुणं व्यक्तमव्यक्तं च, अगु-
णः पुरुषः । अविवेकि व्यक्तमव्यक्तं च, विवेकी पुरुषः । तथा विषयो
व्यक्तमव्यक्तं च, अविषयः पुरुषः । तथा सामान्यं व्यक्तमव्यक्तं च, अ-
सामान्यः पुरुषः । अचेतनं व्यक्तमव्यक्तं च, चेतनः पुरुषः, सुखदुःख-
मोहांश्चेतयति संजानीते तस्माच्चेतनः पुरुष इति । प्रसवधर्मि व्यक्तं
प्रधानं च, अप्रसवधर्मी पुरुषः, न हि किंचित् पुरुषात् प्रसूयते, त-
स्मादुक्तं तद्विपरीतः पुमानिति । तदुक्तं तथा च पुमानिति, तत्
पूर्वस्यामार्यायां प्रधानमहेतुमद्यथा व्याख्यातं तथा च पुमान्, तद्य-
था हेतुमदनित्यमित्यादि व्यक्तं तद्विपरीतमव्यक्तम्, तत्र हेतुमद्व्य-
क्तमहेतुमत् प्रधानम्, तथा च पुमानहेतुमान्, अनुत्पाद्यत्वात् । अ-
नित्यं व्यक्तं नित्यं प्रधानम्, तथा च नित्यः पुमान् । अव्यापि व्यक्तं
व्यापि प्रधानम्, तथा च व्यापी पुमान्, सर्वगतत्वात् । सक्रियं व्य-
क्तमक्रियं प्रधानम्, तथा च पुमानक्रियः, सर्वगतत्वादेव । अनेकं
व्यक्तमेकमव्यक्तम्, तथा च पुमानप्येकः (१) । आश्रितं व्यक्तमनाश्रित-
मव्यक्तम्, तथा च पुमाननाश्रितः । लिङ्गं व्यक्तमलिङ्गं प्रधानम्, तथा
च पुमानप्यलिङ्गः, न क्वचिल्लीयत इति । सावयवं व्यक्तं निरवयवम-

(१) एकरूप इत्यर्थः ।



व्यक्तम्, तथा च पुमान् निरवयवः, न हि पुरुषे शब्दादयोऽवयवाः
सन्ति । किंच परतन्त्रं व्यक्तं स्वतन्त्रमव्यक्तम्, तथा च पुमानपि स्व-
तन्त्रः, आत्मनः प्रभवतीत्यर्थः ॥ ११ ॥

एवमेतद्व्यक्तपुरुषयोः साधर्म्यं व्याख्यातं पूर्वस्यामार्यायाम् । व्य-
क्तप्रधानयोः साधर्म्यं पुरुषस्य वैधर्म्यं च त्रिगुणमविवेकीत्यादिप्रक्र-
तार्यायां व्याख्यातम् । तत्र यदुक्तं त्रिगुणमिति व्यक्तमव्यक्तं च तत्
के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह ।

प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्च, गुणाः सत्त्वरजस्त-
मांसीत्यर्थः । तत्र प्रीत्यात्मकं सत्त्वम्, प्रीतिः सुखं तदात्मकमिति ।
अप्रीत्यात्मकं रजः, अप्रीतिर्दुःखम् । विषादात्मकं तमः, विषादो
मोहः । तथा प्रकाशप्रवृत्तिनियमार्थाः । अर्थशब्दः सामर्थ्यवाची, प्र-
काशार्थं सत्त्वम्, प्रकाशसमर्थमित्यर्थः । प्रवृत्त्यर्थं रजः । नियमार्थं
तमः, स्थितौ समर्थमित्यर्थः । प्रकाशक्रियास्थितिशीला गुणा इति ।
तथाऽन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च । अन्योन्याभिभवा अ-
न्योन्याश्रया अन्योन्यजनना अन्योन्यमिथुना अन्योन्यवृत्तयश्च ते त-
थोक्ताः । अन्योन्याभिभवा इति, अन्योन्यं परस्परमभिभवन्तीति,
प्रीत्यप्रीत्यादिभिर्धर्मैराविर्भवन्ति, यथा यदा सत्त्वमुत्कटं भवति त-
दा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रकाशात्मनावतिष्ठते, यदा
रजस्तदा सत्त्वतमसी अप्रीतिप्रवृत्त्यात्मना धर्मेण, यदा तमस्तदा
सत्त्वरजसी विषादस्थित्यात्मकेनेति । तथान्योन्याश्रयाश्च द्व्यणुकवद्गु-
णाः । अन्योन्यजननाः, यथा मृत्पिण्डो घटं जनयति । तथान्योन्य-
मिथुनाश्च, यथा स्त्रीपुंसावन्योन्यमिथुनौ तथा गुणाः । उक्तं च "र-
जसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । उभयोः सत्त्वरजसोर्मिथुनं
तम उच्यते" ॥ परस्परसहाया इत्यर्थः । अन्योन्यवृत्तयश्च परस्परं व-
र्तन्ते, "गुणा गुणेषु वर्तन्त" इति वचनात् । यथा सुरूपा सुशीला
स्त्री सर्वसुखहेतुः सपत्नीनां सैव दुःखहेतुः सैव रागिणां मोहं जन-

यति, एवं सत्त्वं रजस्तमसोर्वृत्तिहेतुः, यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे शिष्टानां सुखमुत्पादयति दुष्टानां दुःखं मोहं च, एवं रजः सत्त्वतमसोर्वृत्तिं जनयति। तथा तमः स्वरूपेणावरणात्मकेन सत्त्वरजसोर्वृत्तिं जनयति, यथा मेघाः खमावृत्य जगतः सुखमुत्पादयन्ति ते वृष्ट्या कर्षकाणां कर्षणोद्योगं जनयन्ति विरहिणां मोहम्, एवमन्योन्यवृत्तयो गुणाः ॥ १२ ॥

किंचान्यत्।

सत्त्वं लघु प्रकाशकं च, यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणां भवति। उपष्टम्भकं चलं च रजः, उपष्टभ्नातीत्युपष्टम्भकमुद्द्योतकं यथा वृषो वृषदर्शने उत्कटमुपष्टम्भं करोति, एवं रजोवृत्तिः, तथा रजश्च चलं दृष्टम्, रजोवृत्तिश्चलचित्तो भवति। गुरु वरणकमेव तमः, यदा तम उत्कटं भवति तदा गुरूण्यङ्गान्यावृतानीन्द्रियाणि भवन्ति स्वार्थासमर्थानि। अत्राह यदि गुणाः परस्परं विरुद्धाः स्वमतेनैव कमर्थं निष्पादयन्ति, तर्हि? कथम्, प्रदीपवच्चार्थतो वृत्तिः, प्रदीपेन तुल्यं प्रदीपवत्, अर्थतःसाधना वृत्तिरिष्टा, यथा प्रदीपः परस्परविरुद्धतैलाग्निवर्तिसंयोगादर्थप्रकाशान् जनयति, एवं सत्त्वरजस्तमांसि परस्परं विरुद्धान्यर्थं निष्पादयन्ति ॥ १३ ॥

अन्तरप्रश्नो भवति त्रिगुणमविवेकिविषय इत्यादिना प्रधानं व्यक्तं च व्याख्यातम्,? तत्र प्रधानमुपलभ्यमानं महदादि च त्रिगुणमविवेक्यादीति च कथमवगम्यते तत्राह।

योऽयमविवेक्यादिर्गुणः स त्रैगुण्यान्महदादौ व्यक्ते नायं सिध्यति। अत्रोच्यते तद्विपर्ययाभावात्, तस्य विपर्ययस्तद्विपर्ययस्तस्याभावस्तद्विपर्ययाभावः, तस्मात् सिद्धमव्यक्तम्, यथा यत्रैव तन्तवस्तत्रैव पटः, अन्ये तन्तवोऽन्यः पटो न, कुतः, तद्विपर्ययाभावात्, एवं व्यक्ताव्यक्तसंपन्नो भवति, दूरं प्रधानमासन्नं व्यक्तम्, यो व्यक्तं पश्यति स प्र-



धानमपि पश्यति तद्विपर्ययाभावात्। इतश्चाव्यक्तं सिद्धं कारणगुणात्मकत्वात् कार्यस्य, लोके यदात्मकं कारणं तदात्मकं कार्यमपि यथा कृष्णेभ्यस्तन्तुभ्यः कृष्ण एव पटो भवति, एवं महदादि लिङ्गमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि, यदात्मकं लिङ्गं तदात्मकमव्यक्तमपि सिद्धम् ॥ १४ ॥

त्रैगुण्यादविवेक्यादिर्व्यक्ते सिद्धस्तद्विपर्ययाभावात्, एवं कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धमित्येतन्मिथ्या, लोके यन्नोपलभ्यते तन्नास्ति, इति न वाच्यम्, सतोऽपि पाषाणगन्धादेरनुपलम्भात्, एवं प्रधानमप्यस्ति किंतु नोपलभ्यते तदाह।

कारणमस्त्यव्यक्तमिति क्रियाकारकसंबन्धः। भेदानां परिमाणात्, लोके यत्र कर्तास्ति तस्य परिमाणं दृष्टं यथा कुलालः परिमितैर्मृत्पिण्डैः परिमितानेव घटान् करोति, एवं महदपि महदादि लिङ्गं परिमितं भेदतः, प्रधानकार्यमेका बुद्धिरेकोऽहंकारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानीत्येवं भेदानां परिमाणादस्ति प्रधानं कारणं यद् व्यक्तं परिमितमुत्पादयति, यदि प्रधानं न स्यात् तदा निष्परिमाणमिदं व्यक्तमपि न स्यात्, परिमाणाच्च भेदानामस्ति प्रधानं यस्माद्व्यक्तमुत्पन्नम्। तथा समन्वयात्, इह लोके प्रसिद्धिर्दृष्टा यथा व्रतधारिणं वटुं दृष्ट्वा समन्वयति नूनमस्य पितरौ ब्राह्मणाविति, एवमिदं त्रिगुणं महदादि लिङ्गं दृष्ट्वा साधयामोऽस्य यत् कारणं भविष्यतीति, अतः समन्वयादस्ति प्रधानम्। तथा शक्तितः प्रवृत्तेश्च, इह यो यस्मिन् शक्तः स तस्मिन्नेवार्थे प्रवर्तते यथा कुलालो घटस्य करणे समर्थो घटमेव करोति न पटं रथं वा। तथा ० अस्ति प्रधानं कारणम्, कुतः, कारणकार्यविभागात्, करोतीति कारणम्, क्रियत इति कार्यम्, कारणस्य कार्यस्य च विभागो यथा घटो दधिमधूदकपयसां धारणे समर्थो न तत्कारणं मृत्पिण्डः, मृत्पिण्डो वा घटं निष्पादयति न चैवं घटो मृत्पिण्डम्, एवं महदादि लिङ्गं

दृष्टानुमीयते, अस्ति विभक्तं तत् कारणं यस्य विभाग इदं व्यक्तमिति । इतश्च, अविभागाद्वैश्वरूप्यस्य, विश्वं जगत्, रूपं व्यक्तिः, विश्वरूपस्य भावो वैश्वरूप्यम्, तस्याविभागादस्ति प्रधानम्, यस्मात् त्रैलोक्यस्य पञ्चानां पृथिव्यादीनां महाभूतानां परस्परं विभागो नास्ति महाभूतेष्वन्तर्भूतास्त्रयो लोका इति, पृथिव्यापस्तेजो वायुराकाशमिति, एतानि पञ्च महाभूतानि प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु, तन्मात्राण्येकादशेन्द्रियाणि चाहंकारे ० अहंकारो बुद्धौ बुद्धिः प्रधाने, एवं त्रयो लोकाः प्रलयकाले प्रकृतावविभागं गच्छन्ति, तस्मादविभागात् क्षीरदधिवद्व्यक्ताव्यक्तयोरस्त्यव्यक्तं कारणम् ॥ १५ ॥

अतश्चाव्यक्तं प्रख्यातं कारणमस्ति यस्मान्महदादि लिङ्गं प्रवर्तते । त्रिगुणतः ० त्रिगुणात्, सत्त्वरजस्तमांसि गुणा यस्मिंस्तत् त्रिगुणम्, तत् किमुक्तं भवति, सत्त्वरजस्तमसां साम्यावस्था प्रधानम् । तथा समुदयात्, यथा गङ्गास्रोतांसि त्रीणि रुद्रमूर्धनि पतितान्येकं स्रोतो जनयन्ति, एवं त्रिगुणमव्यक्तमेकं व्यक्तं जनयति यथा वा तन्तवः समुदिताः पटं जनयन्ति, एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्तते । यस्मादेकस्मात् प्रधानाद्व्यक्तं तस्मादेकरूपेण भवितव्यम्, नैष दोषः, परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्, एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नास्तुल्यभावा न भवन्ति, देवाः सुखेन युक्ता मनुष्या दुःखेन तिर्यञ्चो मोहेन, एकस्मात् प्रधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवद्भवति, प्रतिप्रतीति वीप्सा, गुणानामाश्रयो गुणाश्रयस्तद्विशेषस्तं गुणाश्रयविशेषं प्रतिनिधाय प्रतिप्रतिगुणाश्रयविशेषं परिणामात् प्रवर्तते व्यक्तम्, यथाकाशादेकरसं सलिलं पतितं नानारूपात् संश्लेषाद्भिद्यते तत्तद्रसान्तरैः, एवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति, देवेषु



सत्त्वमुत्कटं रजस्तमसी उदासीने तेन तेऽत्यन्तसुखिनः, मनुष्येषु रज उत्कटं भवति सत्त्वतमसी उदासीने तेन तेऽत्यन्तदुःखिनः, तिर्यक्षु तम उत्कटं भवति सत्त्वरजसी उदासीने तेन तेऽत्यन्तमूढाः ॥ १६ ॥

एवमार्याद्वयेन प्रधानस्यास्तित्वमवगम्यते, इतश्चोत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह ।

यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षः प्राप्यत इति, तत्र व्यक्तादनन्तरमव्यक्तं पञ्चभिः कारणैरधिगतं व्यक्तवत्, पुरुषोऽपि सूक्ष्मस्तस्याधुनानुमितास्तित्वं प्रतिक्रियते । अस्ति पुरुषः कस्मात् संघातपरार्थत्वात् । योऽयं महदादिसंघातः स पुरुषार्थ इत्यनुमीयते, अचेतनत्वात् पर्यङ्कवत्, यथा पर्यङ्कः प्रत्येकं गात्रोत्पलकपादपीठतूलीप्रच्छादनपटोपधानसंघातः परार्थो न हि स्वार्थः, पर्यङ्कस्य न हि किंचिदपि गात्रोत्पलाद्यवयवानां परस्परं कृत्यमस्ति, अतोऽवगम्यतेऽस्ति पुरुषो यः पर्यङ्के शेते यस्यार्थं पर्यङ्कस्तत् परार्थम्, इदं शरीरं पञ्चानां महाभूतानां संघातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादिसंघातरूपं समुत्पन्नमिति । इतश्चात्माऽस्ति त्रिगुणादिविपर्ययात्, यदुक्तं पूर्वस्यामार्यायां त्रिगुणमविवेकि विषय इत्यादि, तस्माद्विपर्ययात्, येनोक्तं तद्विपरीतस्तथा च पुमान् । अधिष्ठानात्, यथेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाधिष्ठितः प्रवर्तते तथात्माऽधिष्ठानाच्छरीरमिति, तथा चोक्तं षष्टितन्त्रे "पुरुषाधिष्ठितं प्रधानं प्रवर्तते", अतोऽस्त्यात्मा, भोक्तृत्वात्, यथा मधुराम्ललवणकटुतिक्तकषायषड्रसोपबृंहितस्य संयुक्तस्यान्नस्य साध्यते, एवं महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति । इतश्च, कैवल्यार्थं प्रवृत्तेश्च, केवलस्य भावः कैवल्यं तन्निमित्तं या च प्रवृत्तिस्तस्याः स्वकैवल्यार्थं प्रवृत्तेः सकाशादनुमीयते, अस्त्यात्मेति, यतः सर्वो विद्वानविद्वांश्च संसारसंतानक्षयमिच्छति । एवमेभिर्हेतुभिरस्त्यात्मा शरीराद्व्यतिरिक्तः ॥ १७ ॥

अथ स किमेकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत् ० आहोस्विद्बहव आत्मानः प्रतिशरीरमधिष्ठातार इत्यत्रोच्यते ।

जन्म च मरणं च करणानि च जन्ममरणकरणानि तेषां प्रतिनियमात्, प्रत्येकनियमादित्यर्थः । यद्येक एवात्मा स्यात् तत एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये वाधिर्यान्धत्वमूकत्वकुणित्वखञ्जत्वलक्षणे सर्वेऽपि बधिरान्धकुणिखञ्जाः स्युः, न चैवं भवति, तस्माज्जन्ममरणकरणानां प्रतिनियमात् पुरुषबहुत्वं सिद्धम् । इतश्च, अयुगपत् प्रवृत्तेश्च, युगपदेककालम्, न युगपदयुगपत् प्रवर्तनम्, यस्मादयुगपद्धर्मादिषु प्रवृत्तिर्दृश्यते, एके धर्मे प्रवृत्ता अन्येऽधर्मे वैराग्येऽन्ये ज्ञानेऽन्ये प्रवृत्ताः, तस्मादयुगपत् प्रवृत्तेश्च बहव इति सिद्धम् । किंचान्यत्, त्रैगुण्यविपर्ययाच्चैव, त्रिगुणभावविपर्ययाच्च पुरुषबहुत्वं सिद्धम्, यथा सामान्ये जन्मनि एकः सात्त्विकः सुखी, अन्यो राजसो दुःखी, अन्यस्तामसो मोहवान्, एवं त्रैगुण्यविपर्ययाद्बहुत्वं सिद्धमिति ॥ १८ ॥

अकर्ता पुरुष इत्येतदुच्यते ।

तस्माच्च विपर्यासात्, तस्माच्च यथोक्तत्रैगुण्यविपर्यासाद्विपर्ययान्निर्गुणः पुरुषो विवेकी भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्यास उक्तस्तस्मात्, सत्त्वरजस्तमःसु कर्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्येति, योऽयमधिकृतो बहुत्वं प्रति । गुणा एव कर्तारः प्रवर्तन्ते, साक्षी न प्रवर्तते नापि निवर्तत एव । किंचान्यत्, कैवल्यं केवलभावः, कैवल्यमन्यत्वमित्यर्थः, त्रिगुणेभ्यः केवलोऽन्यः । माध्यस्थ्यं मध्यस्थभावः, परिव्राजकवन्मध्यस्थः पुरुषः, यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः, पुरुषोऽप्येवं गुणेषु प्रवर्तमानेषु न प्रवर्तते, तस्माद्द्रष्टृत्वमकर्तृभावश्च, यस्मान्मध्यस्थस्तस्माद्द्रष्टा तस्मादकर्ता पुरुषस्तेषां कर्मणामिति सत्त्वरजस्तमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते न पुरुषः, एवं पुरुषस्यास्तित्वं च सिद्धम् ॥ १८ ॥



यस्मादकर्ता पुरुषस्तत् कथमध्यवसायं करोति धर्मं करिष्याम्यधर्मं न करिष्यामीत्यतः कर्ता भवति, न च कर्ता पुरुष एवमुभयथा दोषः स्यादित्यत उच्यते । इह पुरुषश्चेतनावान् तेन चेतनावभाससंयुक्तं महदादि लिङ्गं चेतनावदिव भवति, यथा लोके घटः शीतसंयुक्तः शीतः, उष्णसंयुक्त उष्णः, एवं महदादि लिङ्गं तस्य संयोगात् पुरुषसंयोगाच्चेतनावदिव भवति । तस्माद् गुणा अध्यवसायं कुर्वन्ति न पुरुषः । यद्यपि लोके पुरुषः कर्ता गन्तेत्यादि प्रयुज्यते तथाप्यकर्ता पुरुषः, ? कथम्, गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः, गुणानां कर्तृत्वे सति उदासीनोऽपि पुरुषः कर्तेव भवति, न कर्ता । अत्र दृष्टान्तो भवति, यथाऽचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यते, एवं त्रयो गुणाः कर्तारः, तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्ता भवति कर्तृसंयोगात् । एवं व्यक्ताव्यक्तज्ञानां विभागो विख्यातः, यद्विभागान्मोक्षप्राप्तिरिति ॥ २० ॥

अथैतयोः प्रधानपुरुषयोः किंहेतुः संघात उच्यते ।

पुरुषस्य प्रधानेन सह संयोगो दर्शनार्थम्, प्रकृतिं महदादिकार्यं भूतपर्यन्तं पुरुषः पश्यति, एतदर्थम्, प्रधानस्यापि पुरुषेण संयोगः कैवल्यार्थम्, स च संयोगः पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः, यथा एकः पङ्गुरेकश्चान्ध एतौ द्वावपि गच्छन्तौ महता सामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ दैवादितश्चेतश्च चेरतुः, स्वगत्या च तौ संयोगमुपयातौ पुनस्तयोः स्ववचसोर्विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थं च भवति, अन्धेन पङ्गुः स्कन्धमारोपितः, एवं शरीरारूढपङ्गुदर्शितेन मार्गेणान्धो याति पङ्गुश्चान्धस्कन्धारूढः, एवं पुरुषे दर्शनशक्तिरस्ति पङ्ग्वन्न क्रिया, प्रधाने क्रियाशक्तिरस्त्यन्धवन्न दर्शनशक्तिः । यथावानयोः पङ्ग्वन्धयोः कृतार्थयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति तयोः कृतार्थयोर्विभागो भ-

विष्यति । किंचान्यत्, तत्कृतः सर्गः, तेन संयोगेन कृतस्तत्कृतः, सर्गः सृष्टिः, यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्तिः ॥ २१ ॥

इदानीं सर्गविभागदर्शनार्थमाह ।

प्रकृतिः प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्यायाः । अलिङ्गस्य प्रकृतेः सकाशान्महानुत्पद्यते, महान् बुद्धिरासुरी मतिः ख्यातिर्ज्ञानमिति प्रज्ञापर्यायैरुत्पद्यते । तस्माच्च महतोऽहंकार उत्पद्यते, अहंकारो भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्यायाः । तस्माद्गणश्च षोडशकः, तस्मादहंकारात् षोडशकः षोडशस्वरूपेण गण उत्पद्यते, स यथा, पञ्च तन्मात्राणि शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति तन्मात्रसूक्ष्मपर्यायवाच्यानि, तत एकादशेन्द्रियाणि श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि, उभयात्मकमेकादशं मनश्च, एष षोडशको गणोऽहंकारादुत्पद्यते । किंच पञ्चभ्यः पञ्च भूतानि, तस्मात् षोडशकाद्गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते । यदुक्तम्, शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात् तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी, एवं पञ्चभ्यः परमाणुभ्यः पञ्च महाभूतान्युत्पद्यन्ते ॥ २२ ॥

यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष इति, तत्र महदादि भूतान्तं त्रयोविंशतिभेदं व्याख्यातम्, अव्यक्तमपि भेदानां परिमाणादित्यादिना व्याख्यातम्, पुरुषोऽपि संघातपरार्थत्वादिभिर्हेतुभिर्व्याख्यातः, एवमेतानि पञ्चविंशतितत्त्वानि, यस्तैस्त्रैलोक्यं व्याप्तं जानाति तस्य भावोऽस्तित्वं तत्त्वम्, यथोक्तम्, "पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः" ॥ तानि यथा, प्रकृतिः पुरुषो बुद्धिरहंकारः पञ्च तन्मात्राणि ० एकादशेन्द्रियाणि पञ्च महाभूतानि, इत्येतानि पञ्चविंशतितत्त्वानि । त-



त्रोक्तप्रकृतेर्महानुत्पद्यते, तस्य महतः किं लक्षणमित्येतदाह ।

अध्यवसायो बुद्धिलक्षणम् । अध्यवसानमध्यवसायः, यथा बीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायोऽयं घटोऽयं पट इत्येवं सति या सा बुद्धिरिति लक्ष्यते, सा च बुद्धिरष्टाङ्गिका सात्त्विकतामसरूपभेदात्, सात्त्विकं रूपं चतुर्विधं भवति धर्मो ज्ञानं वैराग्यमैश्वर्यं चेति, तत्र धर्मो नाम दयादानयमनियमलक्षणः, तत्र यमा नियमाश्च पातञ्जलेऽभिहिताः, "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः", "शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" । ज्ञानं प्रकाशोऽवगमो भानमिति पर्यायाः, तच्च द्विविधं बाह्यमाभ्यन्तरं चेति । तत्र बाह्यं नाम वेदाः शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्यौतिषाख्यषडङ्गसहिताः पुराणानि न्यायमीमांसाधर्मशास्त्राणि चेति । आभ्यन्तरं प्रकृतिपुरुषज्ञानम्, इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थाऽयं पुरुषः सिद्धो निर्गुणो व्यापी चेतन इति । तत्र बाह्यज्ञानेन लोकपङ्क्तिर्लोकानुराग इत्यर्थः । आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः । वैराग्यमपि द्विविधं बाह्यमाभ्यन्तरं च । बाह्यं दृष्टविषयवैतृष्ण्यमर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनाद् विरक्तस्य, आभ्यन्तरं प्रधानमप्यत्र स्वप्नेन्द्रजालसदृशमिति विरक्तस्य, मोक्षेप्सोर्यदुत्पद्यते तदाभ्यन्तरं वैराग्यम् । ऐश्वर्यमीश्वरभावः, तच्चाष्टगुणम्, अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्र कामावसायित्वं चेति । अणोर्भावोऽणिमा सूक्ष्मो भूत्वा जगति विचरतीति । महिमा महान् भूत्वा विचरतीति । लघिमा मृणालीतूलावयवादपि लघुतया पुष्पकेसराग्रेष्वपि तिष्ठति । प्राप्तिरभिमतं वस्तु यत्र तत्रावस्थितः प्राप्नोति । प्राकाम्यं प्रकामतो यदेवेच्छति तदेव विदधाति । ईशित्वं प्रभुतया त्रैलोक्यमपीष्टे । वशित्वं सर्वं वशीभवति । यत्र कामावसायित्वं ब्रह्मादिस्तम्बपर्यन्तम्, यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति । चत्वार्येतानि बुद्धेः सात्त्विकानि रूपाणि । यदा

सत्त्वेन रजस्तमसी अभिभूते तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति । किंचान्यत् । तामसमस्माद्विपर्यस्तम्, अस्माद्धर्मादेर्विपरीतं तामसं बुद्धिरूपम्, तत्र धर्माद्विपरीतोऽधर्मः, एवमज्ञानमवैराग्यमनैश्वर्यमिति । एवं सात्त्विकैस्तामसैः स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणादव्यक्तादुत्पद्यते ॥ २३ ॥

एवं बुद्धिलक्षणमुक्तम्, अहंकारलक्षणमुच्यते ।

एकादशकश्च गण एकादशेन्द्रियाणि तथा तन्मात्रो गणः पञ्चकः पञ्चलक्षणोपेतः शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रलक्षणोपेतः ॥ २४ ॥

किंलक्षणात् सर्ग इत्येतदाह ।

सत्त्वेनाभिभूते यदा रजस्तमसी अहंकारे भवतस्तदा सोऽहंकारः सात्त्विकः, तस्य च पूर्वाचार्यैः संज्ञा कृता वैकृत इति, तस्माद्वैकृतादहंकारादेकादशक इन्द्रियगण उत्पद्यते, तस्मात् सात्त्विकानि विशुद्धानीन्द्रियाणि स्वविषयसमर्थानि, तस्मादुच्यते सात्त्विक एकादशक इति । किंचान्यत् । भूतादेस्तन्मात्रः स तामसः, तमसाभिभूते सत्त्वरजसी अहंकारे यदा भवतस्तदा सोऽहंकारस्तामस उच्यते, तस्य पूर्वाचार्यकृता संज्ञा भूतादिः, तस्माद्भूतादेरहंकारात् तन्मात्रः पञ्चको गण उत्पद्यते, भूतानामादिभूतस्तमोबहुलस्तेनोक्तः स तामस इति, तस्माद्भूतादेः पञ्चतन्मात्रको गणः । किंच तैजसादुभयम्, यदा रजसाभिभूते सत्त्वतमसी अहंकारे भवतस्तदा तस्मात् सोऽहंकारस्तैजस इति संज्ञां लभते, तस्मात्तैजसादुभयमुत्पद्यते, उभयमिति एकादशो गणस्तन्मात्रः पञ्चकः । योऽयं सात्त्विकोऽहंकारो वैकृतिको वैकृतो भूत्वा एकादशेन्द्रियाण्युत्पादयति स तैजसमहंकारं सहायं गृह्णाति, सात्त्विको निष्क्रियः स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थः, तथा तामसोऽहंकारो भूतादिसंज्ञितो निष्क्रियत्वात् तैजसेनाहंकारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति तेनोक्तं तैजसादुभयमिति, एवं तैजसेनाहंकारेणेन्द्रियाण्येकादश पञ्च तन्मात्राणि कृतानि भवन्ति ॥ २५ ॥



सात्त्विक एकादशक इत्युक्तः, यो वैकृतात् सात्त्विक एकादशकः सात्त्विकादहंकारादुत्पद्यते तस्य का संज्ञेत्याह ।

चक्षुरादीनि स्पर्शन(१)पर्यन्तानि बुद्धीन्द्रियाण्युच्यन्ते, स्पृश्यतेऽनेनेति स्पर्शनं त्वगिन्द्रियं तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति तेनेदं पठ्यते स्पर्शनानीति, शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान् बुध्यन्ते ॰ अवगच्छन्तीति पञ्च बुद्धीन्द्रियाणि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः, कर्म कुर्वन्तीति कर्मेन्द्रियाणि, तत्र वाग् वदति हस्तौ नानाव्यापारं कुरुतः पादौ गमनागमनं पायुरुत्सर्गं करोति उपस्थ आनन्दं प्रजोत्पत्त्या ॥ २६ ॥

एवं बुद्धीन्द्रियकर्मेन्द्रियभेदेन दशेन्द्रियाणि व्याख्यातानि, मन एकादशकं किमात्मकं किंस्वरूपं चेति तदुच्यते ।

अत्रेन्द्रियवर्गे मन उभयात्मकं बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत्, कस्मात्, बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति कर्मेन्द्रियाणां च, तस्मादुभयात्मकं मनः, संकल्पयतीति संकल्पकम् । किंचान्यत् । इन्द्रियं च साधर्म्यात् समानधर्मभावात्, सात्त्विकाहंकाराद्बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्यं प्रति, तस्मात् साधर्म्यान्मनोऽपीन्द्रियम्, एवं तान्येकादशेन्द्रियाणि सात्त्विकाद्वैकृतादहंकारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति, संकल्पो वृत्तिः, बुद्धीन्द्रियाणां शब्दादयो वृत्तयः कर्मेन्द्रियाणां वचनादयः । अथैतानीन्द्रियाणि भिन्नानि भिन्नार्थग्राहकाणि किमीश्वरेणोत स्वभावेन कृतानि, यतः प्रधानबुद्ध्यहंकारा अचेतनाः पुरुषोऽप्यकर्तेत्यत्राह, इह सांख्यानां स्वभावो नाम कश्चित् कारणमस्ति, अत्रोच्यते गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च, इमान्ये-

(१) एतन्मते चक्षुःश्रोत्रघ्राणरसनस्पर्शनानीति कारिकापाठः ।

कादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाः पञ्चानां वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां संकल्पश्च मनसः, एवमेते भिन्नानामेवेन्द्रियाणामर्थाः, गुणपरिणामविशेषात्, गुणानां परिणामो गुणपरिणामस्तस्य विशेषादिन्द्रियाणां नानात्वं बाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण नाहंकारेण न बुद्ध्या न प्रधानेन न पुरुषेण, स्वभावात् कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्न प्रवर्तते प्रवर्तत एव,! कथम्, वक्ष्यतीहैव, वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिः प्रधानस्य ॥ एवमचेतना गुणा एकादशेन्द्रियभावेन प्रवर्तन्ते, विशेषोऽपि तत्कृत एव येनोच्चैः प्रदेशे चक्षुरवलोकनाय स्थितम्, तथा घ्राणं तथा श्रोत्रं तथा जिह्वा स्वदेशे स्वार्थग्रहणाय । एवं कर्मेन्द्रियाण्यपि यथायथं स्वार्थसमर्थानि स्वदेशावस्थितानि स्वभावतो गुणपरिणामविशेषादेव, न तदर्था अपि, यत उक्तं शास्त्रान्तरे, “गुणा गुणेषु वर्तन्ते”, गुणानां या वृत्तिः सा गुणविषयैवेति बाह्यार्था विज्ञेया गुणकृता एवेत्यर्थः, प्रधानं यस्य कारणमिति ॥ २७ ॥

अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते ।

मात्रशब्दो विशेषार्थोऽविशेषव्यावृत्त्यर्थो यथा भिक्षामात्रं लभ्यते नान्यो विशेष इति, तथा चक्षू रूपमात्रे न रसादिषु, एवं शेषाण्यपि, तद्यथा चक्षुषो रूपं जिह्वाया रसो घ्राणस्य गन्धः श्रोत्रस्य शब्दः ० त्वचः स्पर्शः । एवमेषां बुद्धीन्द्रियाणां वृत्तिः कथिता । कर्मेन्द्रियाणां वृत्तिः कथ्यते, वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्, कर्मेन्द्रियाणामित्यर्थः । वाचो वचनं हस्तयोरादानं पादयोर्विहरणं पायोर्भुक्तस्याहारस्य परिणतमलोत्सर्गः, उपस्थस्यानन्दः सुतोत्पत्तिर्विषयः, वृत्तिरिति संबन्धः ॥ २८ ॥

अधुना बुद्ध्यहंकारमनसामुच्यते ।

स्वलक्षणस्वभावा स्वालक्षण्या । अध्यवसायो बुद्धिरिति लक्षणमुक्तं सैव बुद्धिवृत्तिः । तथाऽभिमानोऽहंकार इत्यभिमानलक्षणोऽभिमानवृत्तिश्च । संकल्पकं मन इति लक्षणमुक्तं तेन संकल्प एव मनसो वृत्तिः । त्रयस्य बुद्ध्यहंकारमनसां स्वालक्षण्या वृत्तिरसामान्या, या प्रागभिहिता बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति । इदानीं सामान्या वृत्तिराख्यायते, सामान्यकरणवृत्तिः, सामान्येन करणानां वृत्तिः प्राणाद्या वायवः पञ्च, प्राणापानसमानोदानव्याना इति पञ्च वायवः सर्वेन्द्रियाणां सामान्या वृत्तिः, यतः, प्राणो नाम वायुर्मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं कर्म तत् त्रयोदशविधस्याऽपि सामान्या वृत्तिः, सति प्राणे यस्मात् करणानामात्मलाभ इति, प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलनं करोतीति, प्राणनात् प्राण इत्युच्यते । तथाऽपनयनादपानः, तत्र यत् स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य । तथा समानो मध्यदेशवर्ती य आहारादीनां समं नयनात् समानो वायुः, तत्र यत् स्पन्दनं तत् सामान्यकरणवृत्तिः । तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचरः, तत्रोदाने यत् स्पन्दनं तत् सर्वेन्द्रियाणां सामान्या वृत्तिः । किंच शरीरव्याप्तिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्याप्याकाशवद्व्यानः, तत्र यत् स्पन्दनं तत् करणजालस्य सामान्या वृत्तिरिति । एवमेते पञ्च वायवः सामान्यकरणवृत्तिरिति व्याख्याताः, त्रयोदशविधस्यापि करणसामान्या वृत्तिरित्यर्थः ॥ २९ ॥



युगपच्चतुष्टयस्य, बुद्ध्यहंकारमनसामेकैकेन्द्रियसंबन्धे सति चतुष्टयं भवति, चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्तिः, बुद्ध्यहंकारमनश्चक्षूंषि युगपदेककालं रूपं पश्यन्ति स्थाणुरयमिति । बुद्ध्यहंकारमनोजिह्वा युगपद्रसं गृह्णन्ति । बुद्ध्यहंकारमनोघ्राणानि युगपद्गन्धं गृह्णन्ति । तथा त्वक्श्रोत्रे अपि । किंच क्रमशश्च तस्य निर्दिष्टा, तस्येति चतुष्टयस्य, क्रमशश्च वृत्तिर्भवति । यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणुरयं पुरुषो वेति संशये सति तत्रोपरूढं त-

लिङ्गं (१) पश्यति शकुनिं वा, ततस्तस्य मनसा संकल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमिति, अतोऽहंकारश्च निश्चयार्थः स्थाणुरेवेत्येवं बुद्ध्यहंकारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा, यथा रूपे तथा शब्दादिष्वपि बोद्धव्या, दृष्टे दृष्टविषये । किंचान्यत् । तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः, अदृष्टेऽनागतेऽतीते च काले बुद्ध्यहंकारमनसां रूपे चक्षुःपूर्विका त्रयस्य वृत्तिः, स्पर्शे त्वक्पूर्विका गन्धे घ्राणपूर्विका रसे रसनपूर्विका शब्दे श्रवणपूर्विका, बुद्ध्यहंकारमनसामनागते भविष्यति कालेऽतीते च तत्पूर्विका क्रमशो वृत्तिः, वर्तमाने युगपत् क्रमशश्चेति ॥ ३० ॥

किंच । स्वां स्वामिति वीप्सा, बुद्ध्यहंकारमनांसि स्वां स्वां वृत्तिं परस्पराकूतहेतुका "माकूतकादरसंभ्रम" इति० प्रतिपद्यन्ते पुरुषार्थकरणाय बुद्ध्यहंकारादयः, बुद्धिरहंकाराकूतं ज्ञात्वा स्वविषयं प्रतिपद्यते, किमर्थमिति चेत्, पुरुषार्थ एव हेतुः, पुरुषार्थः कर्तव्य इत्येवमर्थं गुणानां प्रवृत्तिः, तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति, यद्यचेतनानीति कथं स्वयं प्रवर्तन्ते, न केनचित् कार्यते करणम्, पुरुषार्थ एवैकः कारयतीति वाक्यार्थः, न केनचित्, ईश्वरेण पुरुषेण वा, कार्यते प्रबोध्यते करणम् ॥ ३१ ॥

बुद्ध्यादि कतिविधं तदित्युच्यते ।

करणं महदादि त्रयोदशविधं बोद्धव्यम्, पञ्च बुद्धीन्द्रियाणि चक्षुरादीनि पञ्च कर्मेन्द्रियाणि वागादीनीति त्रयोदशविधं करणम्, तत् किं करोतीत्येतदाह तदाहरणधारणप्रकाशकरम् । तत्राहरणं धारणं च कर्मेन्द्रियाणि कुर्वन्ति, प्रकाशं बुद्धीन्द्रियाणि । कतिविधं कार्यं तस्येति तदुच्यते, कार्यं च तस्य दशधा, तस्य करणस्य कार्यं कर्तव्यमिति दशधा दशप्रकारम्, शब्दस्पर्शरूपरसगन्धाख्यं वचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्यम्, बुद्धीन्द्रियैः प्रका-

(१)—पाण्डुरां वल्लिं इति पाठान्तरम् ।



शितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥ ३२ ॥

किंच । अन्तःकरणमिति बुद्ध्यहंकारमनांसि, त्रिविधं महदादिभेदात् । दशधा बाह्यं च, बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च दशविधमेतत् करणं बाह्यम्, तत्त्रयस्यान्तःकरणस्य विषयाख्यं बुद्ध्यहंकारमनसां भोग्यं साम्प्रतकालम्, श्रोत्रं वर्तमानमेव शब्दं शृणोति नातीतं न च भविष्यन्तं चक्षुरपि वर्तमानं रूपं पश्यति नातीतं नानागतं त्वग्वर्तमानं स्पर्शं जिह्वा वर्तमानं रसं नासिका वर्तमानं गन्धं नातीतानागतं चेति । एवं कर्मेन्द्रियाणि, वाग् वर्तमानं शब्दमुच्चारयति नातीतं नानागतं पाणी वर्तमानं घटमाददाते नातीतमनागतं च पादौ वर्तमानं पन्थानं विहरतो नातीतं नाप्यनागतं पायूपस्थौ च वर्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नानागतौ, एवं बाह्यं करणं साम्प्रतकालमुक्तम् । त्रिकालमाभ्यन्तरं करणम्, बुद्ध्यहंकारमनांसि त्रिकालविषयाणि, बुद्धिर्वर्तमानं घटं बुध्यते० अतीतमनागतं चेति, अहंकारो वर्तमानेऽभिमानं करोत्यतीतेऽनागते च, तथा मनो वर्तमाने संकल्पं कुरुतेऽतीतेऽनागते च, एवं त्रिकालमाभ्यन्तरं करणमिति ॥ ३३ ॥

इदानीमिन्द्रियाणि कति सविशेषं विषयं गृह्णन्ति कानि निर्विशेषमिति तदुच्यते ।

बुद्धीन्द्रियाणि तेषां सविशेषं विषयं गृह्णन्ति, सविशेषविषयं मानुषाणाम्, शब्दस्पर्शरूपरसगन्धान् सुखदुःखमोहविषययुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति । देवानां निर्विशेषान् विषयान् प्रकाशयन्ति । तथा कर्मेन्द्रियाणां मध्ये वाग् भवति शब्दविषया, देवानां मानुषाणां च वाग्वदति, श्लोकादीनुच्चारयति, तस्माद् देवानां मानुषाणां च वागिन्द्रियं तुल्यम्, शेषाण्यपि वाग्व्यतिरिक्तानि पाणिपादपायूपस्थसंज्ञितानि पञ्चविषयाणि, पञ्च विषयाः शब्दादयो येषां तानि पञ्चविषयाणि, शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति, पञ्चश-

ब्दादिलक्षणायां भुवि पादौ विहरति, पाय्विन्द्रियं पञ्चलक्षणमुत्सर्गं (१) करोति, तथोपस्थेन्द्रियं पञ्चलक्षणं शुक्रमानन्दयति ॥ ३४ ॥

सान्तःकरणा बुद्धिः, अहंकारमनःसहितेत्यर्थः, यस्मात् सर्वं विषयमवगाहते गृह्णाति, त्रिष्वपि कालेषु शब्दादीन् गृह्णाति, तस्मात् त्रिविधं करणं द्वारि, द्वाराणि शेषाणि, करणानीति वाक्यशेषः ॥ ३५ ॥

किंचान्यत् ।

यानि करणान्युक्तानि ० एते गुणविशेषाः, किंविशिष्टाः, प्रदीपकल्पाः प्रदीपवद्विषयप्रकाशकाः, परस्परविलक्षणा असदृशा भिन्नविषया इत्यर्थः, गुणविशेषा गुणेभ्यो जाताः, कृत्स्नं पुरुषस्यार्थं बुद्धीन्द्रियाणि कर्मेन्द्रियाण्यहंकारो मनश्चैतानि स्वं स्वमर्थं पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति बुद्धिस्थं कुर्वन्तीत्यर्थः, यतो बुद्धिस्थं सर्वं विषयसुखादिकं पुरुष उपलभ्यते ॥ ३६ ॥

इदं चान्यत् ।

सर्वेन्द्रियगतं त्रिष्वपि कालेषु सर्वं प्रत्युपभोगमुपभोगं प्रति देवमनुष्यतिर्यग्बुद्धीन्द्रियकर्मेन्द्रियद्वारेण सान्तःकरणा बुद्धिः साधयति संपादयति यस्मात् तस्मात् सैव च विशिनष्टि प्रधानपुरुषयोर्विषयविभागं करोति, प्रधानपुरुषान्तरं नानात्वमित्यर्थः, सूक्ष्ममित्यनधिकृततपश्चरणैरप्राप्यम्, इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था ० इयं बुद्धिरयमहंकार एतानि पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येवं बोधयति बुद्धिः, यस्यावापादपवर्गो भवति ॥ ३७ ॥

पूर्वमुक्तं विशेषाविशेषविषयाणि तत् के विषयास्तान् दर्शयति ।

यानि पञ्च तन्मात्राण्यहंकारादुत्पद्यन्ते शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमेतान्यविशेषा उच्यन्ते देवानामेते सुखलक्षणा विषया दुःखमोहरहिताः, तेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः

(१) पञ्चवृत्त्यंमिति पा० ।



पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशसंज्ञानि यान्युत्पद्यन्ते एते स्मृता विशेषाः, गन्धतन्मात्रात् पृथिवी, रसतन्मात्रादापः, रूपतन्मात्रात् तेजः, स्पर्शतन्मात्राद्वायुः, शब्दतन्मात्रादाकाशम्, इत्येवमुत्पन्नान्येतानि महाभूतान्येते विशेषा मानुषाणां विषयाः शान्ताः सुखलक्षणा घोरा दुःखलक्षणा मूढा मोहजनकाः, यथाकाशं कस्यचिदनवकाशादन्तर्गृहादेर्निर्गतस्य सुखात्मकं शान्तं भवति तदेव शीतोष्णवातवर्षाभिभूतस्य दुःखात्मकं घोरं भवति तदेव पन्थानं गच्छतो वनमार्गाद् भ्रष्टस्य दिङ्मोहान्मूढं भवति, एवं वायुर्घर्मार्तस्य शान्तो भवति शीतार्तस्य घोरो धूलीशर्कराविमिश्रोऽतिवान् मूढ इति, एवं तेजःप्रभृतिषु द्रष्टव्यम् ॥ ३८ ॥

अथाऽन्ये विशेषाः ।

सूक्ष्मास्तन्मात्राणि यत्संगृहीतं तन्मात्रकं सूक्ष्मशरीरं महदादिलिङ्गं सदा तिष्ठति संसरति च ते सूक्ष्माः, तथा मातापितृजाः स्थूलशरीरोपचायका ऋतुकाले मातापितृसंयोगे शोणितशुक्रमिश्रीभावेनोदरान्तःसूक्ष्मशरीरस्योपचयं कुर्वन्ति, तत् सूक्ष्मशरीरं पुनर्मातुरशितपीतनानाविधरसेन नाभीनिबन्धेनाप्यायते, तथाप्यारब्धं शरीरं सूक्ष्मैर्मातापितृजैश्च सह महाभूतैस्त्रिधा विशेषैः, पृष्ठोदरजङ्घाकट्युरःशिरःप्रभृति षाट्कौशिकं पाञ्चभौतिकं रुधिरमांसस्नायुशुक्रास्थिमज्जासंभृतम् ० आकाशोऽवकाशदानाद्वायुर्वर्धनात् तेजः पाकादापः संग्रहात् पृथिवी धारणात् समस्तावयवोपेतं मातुरुदराद्बहिर्भवति, एवमेते त्रिविधा विशेषाः स्युः । अत्राह, ? के नित्याः के वानित्याः । सूक्ष्मास्तेषां नियताः, सूक्ष्मास्तन्मात्रसंज्ञकास्तेषां मध्ये नियता नित्याः, तैरारब्धं शरीरमधर्मवशात् पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति, धर्मवशादिन्द्रादिलोकेषु, एवमेतन्नियतं सूक्ष्मशरीरं संसरति न यावज्ज्ञानमुत्पद्यते, उत्पन्ने ज्ञाने विद्वान् शरीरं त्यक्त्वा मोक्षं गच्छति, तस्मादेते विशेषाः सूक्ष्मा नित्या इति । माता-

पितृजा निवर्तन्ते, तत् सूक्ष्मशरीरं परित्यज्येहैव प्राणत्यागवेलायां मातापितृजा निवर्तन्ते, मरणकाले मातापितृजं शरीरमिहैव निवृत्य भूम्यादिषु प्रलीयते यथातत्त्वम् ॥ ३९ ॥

सूक्ष्मं च कथं संसरति तदाह ।

यदा लोका अनुत्पन्नाः प्रधानादिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति । किंचान्यत् । असक्तं न संयुक्तं तिर्यग्योनिदेवमानुषस्थानेषु, सूक्ष्मत्वात् कुत्रचिदसक्तं पर्वतादिष्वप्रतिहतप्रसरं संसरति गच्छति । नियतम्, यावन्न ज्ञानमुत्पद्यते तावत् संसरति । तच्च महदादिसूक्ष्मपर्यन्तम्, महानादौ यस्य तन्महदादि बुद्धिरहंकारो मन इति पञ्च तन्मात्राणि सूक्ष्मपर्यन्तं तन्मात्रपर्यन्तं संसरति शूलग्रहपिपीलिकावत् त्रीनपि लोकान् । निरुपभोगं भोगरहितं तत् सूक्ष्मशरीरं पितामातृजेन बाह्येनोपचयेन क्रियाधर्मग्रहणाद् भोगेषु समर्थं भवतीत्यर्थः । भावैरधिवासितम्, पुरस्ताद्भावान् वक्ष्यामस्तैरधिवासितमुपरञ्जितम् । लिङ्गमिति, प्रलयकाले महदादिसूक्ष्मपर्यन्तं करणोपेतं प्रधाने लीयते, असंसरणयुक्तं सत्० आसर्गकालमत्र वर्तते प्रकृतिमोहबन्धनबद्धं सत् संसरणादिक्रियास्वसमर्थमिति । पुनः सर्गकाले संसरति तस्माल्लिङ्गं सूक्ष्मम् ॥ ४० ॥

किंप्रयोजनेन त्रयोदशविधं करणं संसरतीत्येवं चोदिते सत्याह ।

चित्रं यथा कुड्याद्याश्रयमृते न तिष्ठति स्थाण्वादिभ्यः कीलकादिभ्यो विना छाया न तिष्ठति तैर्विना न भवति, आदिग्रहणाद् यथा शैत्यं विना नापो भवन्ति शैत्यं वाऽद्भिर्विना ० अग्निरुष्णं विना वायुः स्पर्शं विना आकाशमवकाशं विना पृथिवी गन्धं विना, तद्वदेतेन दृष्टान्तेन न्यायेन विनाविशेषैरविशेषैस्तन्मात्रैर्विना न तिष्ठति । अथ विशेषभूतान्युच्यन्ते, शरीरं पञ्चभूतमयम्, वैशेषिणा शरीरेण विना क्व लिङ्गस्थानं चेति क्व एकदेहमुज्झति तदेवान्यमाश्रयति, निराश्रयमाश्रयरहितम्, लिङ्गं त्रयोदशविधं करणमित्यर्थः ॥ ४१ ॥



किमर्थं तदुच्यते ।

पुरुषार्थः कर्तव्य इति प्रधानं प्रवर्तते, स च द्विविधः शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोपलब्धिलक्षणश्च, शब्दाद्युपलब्धिर्ब्रह्मादिषु लोकेषु गन्धादिभोगावाप्तिः (१), गुणपुरुषान्तरोपलब्धिर्मोक्ष इति, तस्मादुक्तं पुरुषार्थहेतुकमिदं सूक्ष्मशरीरं प्रवर्तत इति । निमित्तनैमित्तिकप्रसङ्गेन, निमित्तं धर्मादि नैमित्तिकमूर्ध्वगमनादि पुरस्तादेव वक्ष्यामः, प्रसङ्गेन प्रसक्त्या प्रकृतेः प्रधानस्य विभुत्वयोगात्, यथा राजा स्वराष्ट्रे विभुत्वाद् यद्यदिच्छति तत् तत् करोतीति, तथा प्रकृतेः सर्वत्र विभुत्वयोगान्निमित्तनैमित्तिकप्रसङ्गेन व्यवतिष्ठते पृथक् पृथग्देहधारणे लिङ्गस्य व्यवस्थां करोति । लिङ्गं सूक्ष्मैः परमाणुभिस्तन्मात्रैरुपचितं शरीरं त्रयोदशविधकरणोपेतं मानुषदेवतिर्यग्योनिषु व्यवतिष्ठते ।? कथम्, नटवत्, यथा नटः पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति पुनर्मानुषः पुनर्विदूषकः, एवं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेनोदरान्तः प्रविश्य हस्ती स्त्री पुमान् भवति ॥ ४२ ॥

भावैरधिवासितं लिङ्गं संसरतीत्युक्तं तत् के भावा इत्याह ।

भावास्त्रिविधाश्चिन्त्यन्ते सांसिद्धिकाः प्राकृता वैकृताश्च, तत्र सांसिद्धिका यथा भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्ना धर्मो ज्ञानं वैराग्यमैश्वर्यमिति । प्राकृताः कथ्यन्ते, ब्रह्मणश्चत्वारः पुत्राः सनकसनन्दनसनातनसनत्कुमारा बभूवुः, तेषामुत्पन्नकार्यकारणानां शरीरिणां षोडशवर्षाणामेते भावाश्चत्वारः समुत्पन्नाः, तस्मादेते प्राकृताः । तथा वैकृताः, यथा आचार्यमूर्तिं निमित्तं कृत्वाऽस्मदादीनां ज्ञानमुत्पद्यते ज्ञानाद्वैराग्यं वैराग्याद्धर्मो धर्मादैश्वर्यमिति, आचार्यमूर्तिरपि विकृतिरिति, तस्माद्वैकृता एते भावा उच्यन्ते, यैरधिवासितं लिङ्गं संसरति । एते चत्वारो भावाः सात्त्विकाः, तामसा विपरीताः, सात्त्विकमेतद्रूपं तामसमस्माद्विपर्य-

(१) शब्दाद्युपलब्धिर्द्रव्यादिषु नो किंतु गन्धादिभ्यो व्याप्तिः, इति पा० ।

स्तमित्यत्र व्याख्याताः। एवमष्टौ धर्मो ज्ञानं वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यमिति, अष्टौ भावाः? क्व वर्तन्ते, दृष्टाः करणाश्रयिणः, बुद्धिः करणं तदाश्रयिणः, एतदुक्तमध्यवसायो बुद्धिर्धर्मो ज्ञानमिति। कार्यं देहस्तदाश्रयाः कललाद्या ये मातृजा इत्युक्ताः, शुक्रशोणितसंयोगे विवृद्धिहेतुकाः कललाद्या बुद्बुदमांसपेशीप्रभृतयः, तथा कौमारयौवनस्थविरत्वादयो भावा अन्नपानरसनिमित्ता निष्पद्यन्ते, अतः कार्याश्रयिण उच्यन्ते, अन्नादिविषयभोगनिमित्ता जायन्ते ॥ ४३ ॥

निमित्तनैमित्तिकप्रसङ्गेनेति यदुक्तमत्रोच्यते।

धर्मेण गमनमूर्ध्वम्, धर्मं निमित्तं कृत्वोर्ध्वमुपयाति, ऊर्ध्वमित्यष्टौ स्थानानि गृह्यन्ते तद्यथा ब्राह्मं प्राजापत्यं सौम्यमैन्द्रं गान्धर्वं याक्षं राक्षसं पैशाचमिति, तत् सूक्ष्मं शरीरं गच्छति। पशुमृगसरीसृपस्थावरान्तेष्वधर्मो निमित्तम्। किंच, ज्ञानेन चापवर्गः, अपवर्गश्च पञ्चविंशतितत्त्वज्ञानम्, तेन निमित्तेनापवर्गो मोक्षः, ततः सूक्ष्मं शरीरं निवर्तते, परमात्मा उच्यते। विपर्ययादिष्यते बन्धः, अज्ञानं निमित्तम्, स चैष नैमित्तिकः प्राकृतो वैकारिको दाक्षिणिकश्च बन्ध इति वक्ष्यति पुरस्ताद्, यदिदमुक्तं "प्राकृतेन च बन्धेन तथा वैकारिकेण च। दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते" ॥ ४४ ॥

तथान्यदपि निमित्तम्।

यथा कस्यचिद्वैराग्यमस्ति न तत्त्वज्ञानं तस्मादज्ञानपूर्वाद्वैराग्यात् प्रकृतिलयो मृतोऽष्टासु प्रकृतिषु प्रधानबुद्ध्यहंकारतन्मात्रेषु लीयते न मोक्षः। ततो भूयोऽयं राजसो रागः, यजामि दक्षिणां ददामि येनामुष्मिंल्लोकेऽत्र यद्दिव्यं मानुषं सुखमनुभवाम्येतस्माद्रागात् संसारो भवति। तथा ऐश्वर्यादविघातः, एतदैश्वर्यमष्टगुणमणिमादियुक्तं तस्मादैश्वर्यनिमित्तादविघातो नैमित्तिको भवति ब्रह्मादिषु स्थानेष्वैश्वर्यं न विहन्यते। किंचान्यत्। विपर्ययात् तद्विपर्यासः, तस्याविघा-



तस्य विपर्यासो विघातो भवति, अनैश्वर्यात् सर्वत्र विहन्यते ॥ ४५ ॥

एष निमित्तैः सह नैमित्तिकः षोडशविधो व्याख्यातः, स किमात्मक इत्याह।

यथा एष षोडशविधो निमित्तनैमित्तिकभेदो व्याख्यात एष प्रत्ययसर्ग उच्यते, प्रत्ययो बुद्धिरित्युक्ता, अध्यवसायो बुद्धिर्धर्मो ज्ञानमित्यादि, स च प्रत्ययसर्गश्चतुर्धा भिद्यते विपर्ययाशक्तितुष्टिसिद्ध्याख्यभेदात्, तत्र संशयोऽज्ञानं विपर्ययः, यथा कस्यचित् स्थाणुदर्शने स्थाणुरयं पुरुषो वेति संशयः। अशक्तिर्यथा तमेव स्थाणुं सम्यग् दृष्ट्वा संशयं छेत्तुं न शक्नोतीत्यशक्तिः। एवं तृतीयस्तुष्ट्याख्यो यथा तमेव स्थाणुं ज्ञातुं संशयितुं वा नेच्छति किमनेनास्माकमित्येषा तुष्टिः। चतुर्थः सिद्ध्याख्यो यथा आनन्दितेन्द्रियः स्थाणुमारूढां वल्लिं पश्यति शकुनिं वा तस्य सिद्धिर्भवति स्थाणुरयमिति। एवमस्य चतुर्विधस्य प्रत्ययसर्गस्य गुणवैषम्यविमर्दात् तस्य भेदास्तु पञ्चाशत्, योऽयं सत्त्वरजस्तमोगुणानां वैषम्यं विमर्दस्तेन तस्य प्रत्ययसर्गस्य पञ्चाशद्भेदा भवन्ति ॥ ४६ ॥

तथा क्वापि सत्त्वमुत्कटं भवति रजस्तमसी उदासीने क्वापि रजः क्वापि तम इति भेदाः कथ्यन्ते।

पञ्च विपर्ययभेदाः, ते यथा तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति, एषां भेदानां नानात्वं वक्ष्यतेऽनन्तरमेवेति। अशक्तिस्त्वष्टाविंशतिभेदा भवन्ति करणवैकल्यात् तानपि वक्ष्यामः। तथा तुष्टिर्नवधा, ऊर्ध्वस्रोतसि राजसानि ज्ञानानि। तथाष्टविधा सिद्धिः, सात्त्विकानि ज्ञानानि तत्रैवोर्ध्वस्रोतसि ॥ ४७ ॥

एतत् क्रमेणैव वक्ष्यते, तत्र विपर्ययभेदा उच्यन्ते।

तमसस्तावदष्टधा भेदः प्रलयोऽज्ञानाद्विभज्यते सोऽष्टासु प्रकृतिषु लीयते प्रधानबुद्ध्यहंकारपञ्चतन्मात्राख्यासु, तत्र लीनमात्मानं मन्यते मुक्तोऽहमिति तमोभेद एषः। अष्टविधस्य मोहस्य भेदोऽष्टविध

एवेत्यर्थः, यत्राष्टगुणमणिमाद्यैश्वर्यं तत्र सङ्गादिन्द्रादयो देवा न मोक्षं प्राप्नुवन्ति पुनश्च तत्क्षये संसरन्त्येषोऽष्टविधो मोह इति। दशविधो महामोहः, शब्दस्पर्शरूपरसगन्धा देवानामिते पञ्च विषयाः सुखलक्षणाः, मानुषाणामप्येत एव शब्दादयः पञ्च विषयाः, एवमेतेषु दशसु महामोह इति। तामिस्रोऽष्टविधमैश्वर्यं दृष्टानुश्रविका विषया दश एतेषामष्टादशानां संपदमनुनन्दन्ति विपदं नानुमोदन्ते, एषोऽष्टादशविधो विकल्पस्तामिस्रः। यथा तामिस्रोऽष्टगुणमैश्वर्यं दृष्टानुश्रविका दश विषयास्तथान्धतामिस्रोऽप्यष्टादशभेद एव। किंतु विषयसंपत्तौ संभोगकाले य एव म्रियतेऽष्टगुणैश्वर्याद्वा भ्रश्यते ततस्तस्य महद्दुःखमुत्पद्यते सोऽन्धतामिस्र इति। एवं विपर्ययभेदास्तमःप्रभृतयः पञ्च प्रत्येकं भिद्यमाना द्विषष्टिभेदाः संवृत्ता इति ॥ ४८ ॥

अशक्तिभेदाः कथ्यन्ते।

भवन्त्यशक्तेश्च करणवैकल्यादष्टाविंशतिभेदा (१) इत्युद्दिष्टम्, तत्रैकादशेन्द्रियवधाः, वाधिर्यमन्धता प्रसुप्तिरुपजिह्विका घ्राणपाको मूकता कुणित्वं खाञ्ज्यं गुदावर्तः क्लैब्यमुन्माद इति। सह बुद्धिवधैरशक्तिरुद्दिष्टा, ये बुद्धिवधास्तैः सहाशक्तेरष्टाविंशतिभेदा भवन्ति। सप्तदश वधा बुद्धेः, सप्तदश वधास्ते तुष्टिभेदसिद्धिभेदवैपरीत्येन, तुष्टिभेदा नव सिद्धिभेदा अष्टौ ये तद्विपरीतैः सह एकादशवधा एवमष्टाविंशतिविकल्पा अशक्तिरिति ॥ ४९ ॥

विपर्ययात् तुष्टिसिद्धीनामेव भेदक्रमो द्रष्टव्यः, तत्र तुष्टिर्नवधा कथ्यते।

आध्यात्मिक्यश्चतस्रस्तुष्टयः, अध्यात्मनि भवा आध्यात्मिक्यः, ताश्च प्रकृत्युपादानकालभाग्याख्याः। तत्र प्रकृत्याख्या यथा कश्चित् प्रकृतिं

(१) पूर्वकारिकायामशक्तेरिति षष्ठ्यन्तोऽष्टाविंशतिभेदाः इति प्रथमाबहुवचनान्तश्च पाठ एतद्व्याख्यात्रभिप्रेतः, पूर्वत्रापि तथैव व्याख्यातत्वात्।



वेत्ति तस्याः सगुणनिर्गुणत्वं च, तेन तत्त्वं तत्कार्यं विज्ञायैव केवलं तुष्टस्तस्य नास्ति मोक्ष एषा प्रकृत्याख्या। उपादानाख्या यथा कश्चिदविज्ञायैव तत्त्वान्युपादानग्रहणं करोति त्रिदण्डकमण्डलुविविदिषाभ्यो मोक्ष इति तस्यापि नास्ति मोक्ष इति, एषा उपादानाख्या। तथा कालाख्या कालेन मोक्षो भविष्यतीति किं तत्त्वाभ्यासेनेत्येषा कालाख्या तुष्टिस्तस्य नास्ति मोक्ष इति। तथा भाग्याख्या भाग्येनैव मोक्षो भविष्यतीति भाग्याख्या। चतुर्धा तुष्टिरिति। बाह्या विषयोपरमाच्च पञ्च, बाह्यास्तुष्टयः पञ्च विषयोपरमात्, शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसङ्गहिंसादर्शनात्, वृद्धिनिमित्तं पाशुपाल्यवाणिज्यप्रतिग्रहसेवाः कार्या एतदर्जनं दुःखम्, अर्जितानां रक्षणे दुःखम्, उपभोगात् क्षीयत इति क्षयदुःखम्, तथा विषयोपभोगसङ्गे कृते नास्तीन्द्रियाणामुपशम इति सङ्गदोषः, तथा नानुपहत्य भूतान्युपभोग इत्येष हिंसादोषः, एवमर्जनादिदोषदर्शनात् पञ्चविषयोपरमात् पञ्च तुष्टयः। एवमाध्यात्मिकबाह्यभेदान्नव तुष्टयः, तासां नामानि शास्त्रान्तरे प्रोक्तानि, “अम्भः सलिलमोघो वृष्टिः सुतमः पारं सुनेत्रं नारीकमनुत्तमाम्भसिक”मिति, आसां तुष्टीनां विपरीता अशक्तिभेदाद्बुद्धिवधा भवन्ति, तद्यथा अनम्भोऽसलिलमनोघ इत्यादिवैपरीत्याद् बुद्धिवधा इति ॥ ५० ॥

सिद्धिरुच्यते।

ऊहो यथा कश्चिन्नित्यमूहते किमिह सत्यं किं परं किं नैःश्रेयसं किं कृत्वा कृतार्थः स्याम्, इति चिन्तयतो ज्ञानमुत्पद्यते प्रधानादन्य एव पुरुष इतोऽन्या बुद्धिरन्योऽहंकारोऽन्यानि तन्मात्राणीन्द्रियाणि पञ्च महाभूतानीत्येवं तत्त्वज्ञानमुत्पद्यते येन मोक्षो भवति, एषा ऊहाख्या प्रथमा सिद्धिः। तथा शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहंकारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति ततो मोक्ष इत्येषा शब्दाख्या सिद्धिः। अध्ययनाद् वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञा-

न प्राप्यत इत्येषा तृतीया सिद्धिः । दुःखविघातत्रयम्, आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयविघाताय गुरुं समुपगम्य तत उपदेशान्मोक्षं याति, एषा चतुर्थी सिद्धिः । एषैव दुःखत्रयभेदात् त्रिधा कल्पनीया इति षट् सिद्धयः । तथा सुहृत्प्राप्तिः, यथा कश्चित् सुहृज्ज्ञानमधिगम्य मोक्षं गच्छति, एषा सप्तमी सिद्धिः । दानम्, यथा कश्चिद् भगवतां प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाच्छादनादीनां च दानेनोपकृत्य तेभ्यो ज्ञानमवाप्य मोक्षं याति, एषाष्टमी सिद्धिः । आसामष्टानां सिद्धीनां शास्त्रान्तरे संज्ञाः कृताः, "तारं सुतारं तारतारं प्रमोदं प्रमुदितं प्रमोदमानं रम्यकं सदाप्रमुदित"मिति, आसां विपर्ययाद्बुद्धेर्वधा ये विपरीतास्ते अशक्तौ निक्षिप्ताः, यथाऽतारमसुतारमतारतारमित्यादि द्रष्टव्यम् । अशक्तिभेदा अष्टाविंशतिरुक्तास्ते सह बुद्धिवधैरेकादशेन्द्रियवधा इति । तत्र तुष्टिविपर्यया नव, सिद्धीनां विपर्यया अष्टौ, एवमेते सप्तदश बुद्धिवधाः, एतैः सहेन्द्रियवधा अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्ययाशक्तितुष्टिसिद्धीनामेवोद्देशो निर्देशश्च कृत इति । किंचान्यत्, सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः, सिद्धेः पूर्वा या विपर्ययाशक्तितुष्टयस्ता एव सिद्धेरङ्कुशस्तद्भेदादेव त्रिविधः, यथा हस्ती गृहीताङ्कुशेन वशो भवति, एवं विपर्ययाशक्तितुष्टिभिर्गृहीतो लोकोऽज्ञानमाप्नोति, तस्मादेताः परित्यज्य सिद्धिः सेव्या, सिद्धेस्तत्त्वज्ञानमुत्पद्यते तस्मान्मोक्ष इति ॥५१॥

अथ यदुक्तं भावैरधिवासितं लिङ्गम्, तत्र भावा धर्मादयोऽष्टावुक्ता बुद्धिपरिणामाः, विपर्ययाशक्तितुष्टिसिद्धिपरिणताः, स भावाख्यः प्रत्ययसर्गो लिङ्गं च तन्मात्रसर्गश्चतुर्दशभूतपर्यन्त उक्तः, तत्रैकेनैव सर्गेण पुरुषार्थसिद्धौ किमुभयविधसर्गेणेत्यत आह ।

भावैः प्रत्ययसर्गैर्विना लिङ्गं न तन्मात्रसर्गो न, पूर्वपूर्वसंस्कारादृष्टकारितत्वादुत्तरोत्तरदेहलम्भस्य, लिङ्गेन तन्मात्रसर्गेण च विना भावनिर्वृत्तिर्न स्थूलसूक्ष्मदेहसाध्यत्वाद्धर्मादेः, अनादित्वाच्च सर्ग-



स्य बीजाङ्कुरवदन्योन्याश्रयो न दोषाय तत्तज्जातीयापेक्षित्वेऽपि तत्तद्व्यक्तीनां परस्परानपेक्षित्वात्, तस्माद्भावाख्यो लिङ्गाख्यश्च द्विविधः प्रवर्तते सर्ग इति ॥ ५२ ॥

किंचान्यत् ।

तत्र दैवमष्टप्रकारम्, ब्राह्मं प्राजापत्यं सौम्यमैन्द्रं गान्धर्वं याक्षं राक्षसं पैशाचमिति । पशुमृगपक्षिसरीसृपस्थावराणि भूतान्येवं पञ्चविधस्तैरश्चः । मानुषयोनिरेकैव । इति चतुर्दश भूतानि ॥ ५३ ॥

त्रिष्वपि लोकेषु गुणत्रयमस्ति तत्र कस्मिन् किमधिकमित्युच्यते ।

ऊर्ध्वमिति, अष्टसु देवस्थानेषु सत्त्वविशालः सत्त्वविस्तारः सत्त्वोत्कट ऊर्ध्वसत्त्व इति, तत्रापि रजस्तमसी स्तः । तमोविशालो मूलतः, पश्वादिषु स्थावरान्तेषु सर्वः सर्गस्तमसाधिक्येन व्याप्तः, तत्रापि सत्त्वरजसी स्तः । मध्ये मानुषे रज उत्कटम्, तत्रापि सत्त्वतमसी विद्येते तस्माद् दुःखप्राया मनुष्याः, एवं ब्रह्मादिस्तम्बपर्यन्तः, ब्रह्मादिस्थावरान्त इत्यर्थः, एवमभौतिकः सर्गो लिङ्गसर्गो भावसर्गो भूतसर्गो दैवमानुषतैर्यग्योना इति, एष प्रधानकृतः षोडशविधः सर्गः ॥ ५४ ॥

तत्रेति, तेषु देवमानुषतिर्यग्योनिषु जराकृतं मरणकृतं चैव दुःखं चेतनश्चैतन्यवान् पुरुषः प्राप्नोति, न प्रधानं न बुद्धिर्नाहंकारो न तन्मात्राणीन्द्रियाणि महाभूतानि च । कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति तद्विविनक्ति लिङ्गस्याविनिवृत्तेरिति, यत् तन्महदादि लिङ्गशरीरेणाविश्य तत्र व्यक्तीभवति, तद्यावन्न निवर्तते संसारशरीरमिति तावत् संक्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृतं दुःखं प्राप्नोति, लिङ्गस्याविनिवृत्तेः, लिङ्गस्य विनिवृत्तिं यावत्, लिङ्गनिवृत्तौ मोक्षो मोक्षप्राप्तौ नास्ति दुःखमिति । तत् पुनः केन निवर्तते, यदा पञ्चविंशतितत्त्वज्ञानं स्यात् सत्त्वपुरुषान्यथाख्यातिलक्षणम्, इदं प्रधानमियं बुद्धिरयमहंकार इमानि पञ्च तन्मात्राण्येकादशेन्द्रियाणि

पञ्च महाभूतानि येभ्योऽन्यः पुरुषो विसदृश इत्येवं ज्ञानाल्लिङ्गनिवृत्तिस्ततो मोक्ष इति ॥ ५५ ॥

प्रकृतेः किंनिमित्त आरम्भ इत्युच्यते ।

इत्येष परिसमाप्तो निर्देशे च, प्रकृतौ (१) प्रकृतिकरणे प्रकृतिक्रियायां य आरम्भो महदादिविशेषभूतपर्यन्तः, प्रकृतेर्महान् महतोऽहंकारस्तस्मात् तन्मात्राण्येकादशेन्द्रियाणि तन्मात्रेभ्यः पञ्च महाभूतानीत्येष प्रतिपुरुषविमोक्षार्थं पुरुषं पुरुषं प्रति देवमनुष्यतिर्यग्भावं गतानां विमोक्षार्थमारम्भः, कथम्, स्वार्थ इव परार्थ आरम्भः, यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्याणि करोति, एवं प्रधानम्, पुरुषोऽत्र प्रधानस्य न किंचित् प्रत्युपकारं करोति, स्वार्थ इव न च स्वार्थः परार्थ एव, अर्थः शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च, त्रिषु लोकेषु शब्दादिविषयैः पुरुषा योजयितव्या अन्ते च मोक्षेणेति प्रधानस्य प्रवृत्तिः, तथा चोक्तम्, "कुम्भवत् प्रधानं पुरुषार्थं कृत्वा निवर्तत" इति ॥ ५६ ॥

अत्रोच्यतेऽचेतनं प्रधानं चेतनः पुरुष इति मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्तव्य इति कथं चेतनवत् प्रवृत्तिः, सत्यम्, किंत्वचेतनानामपि प्रवृत्तिर्दृष्टा निवृत्तिश्च यस्मादित्याह ।

यथा तृणोदकं गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति पुष्टे च वत्से निवर्तते, एवं पुरुषविमोक्षनिमित्तं प्रधानमित्यज्ञस्य प्रवृत्तिरिति ॥ ५७ ॥

किंच ।

यथा लोके इष्टौत्सुक्ये सति तस्य निवृत्त्यर्थं क्रियासु प्रवर्तते गमनागमनक्रियासु कृतकार्यो निवर्तते तथा पुरुषस्य विमोक्षार्थं शब्दादिविषयोपभोगोपलब्धिलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च द्वि-

(१) एतन्मते प्रकृतिकृताविति सप्तम्यन्तः पाठः ।



विधमपि पुरुषार्थं कृत्वा प्रधानं निवर्तते ॥ ५८ ॥

किंचान्यत् ।

यथा नर्तकी शृङ्गारादिरसैरितिहासादिभावैश्च निबद्धगीतवादित्रनृत्यानि रङ्गस्य दर्शयित्वा कृतकार्या नृत्यान्निवर्तते तथा प्रकृतिरपि पुरुषस्यात्मानं प्रकाश्य बुद्ध्यहंकारतन्मात्रेन्द्रियमहाभूतभेदेन निवर्तते ॥ ५९ ॥

कथं को वास्या निवर्तको हेतुस्तदाह ।

नानाविधैरुपायैः प्रकृतिः पुरुषस्योपकारिण्यनुपकारिणः पुंसः, कथम्, देवमानुषतिर्यग्भावेन सुखदुःखमोहात्मकभावेन शब्दादिविषयभावेन, एवं नानाविधैरुपायैरात्मानं प्रकाश्याहमन्या त्वमन्य इति निवर्तते, अतो नित्यस्य तस्यार्थमपार्थकं चरति कुरुते, यथा कश्चित् परोपकारी सर्वस्योपकुरुते नात्मनः प्रत्युपकारमीहते, एवं प्रकृतिः पुरुषार्थं चरति करोत्यपार्थकं पश्चादुक्तमात्मानं प्रकाश्य निवर्तते ॥ ६० ॥

निवृत्ता च किं करोतीत्याह ।

लोके प्रकृतेः सुकुमारतरं न किंचिदस्तीत्येवं मे मतिर्भवति, येन परार्थ एवं मतिरुत्पन्ना, कस्मात्, अहमनेन पुरुषेण दृष्टास्मीत्यस्य पुंसः पुनर्दर्शनं नोपैति, पुरुषस्यादर्शनमुपयातीत्यर्थः, तत्र सुकुमारतरं वर्णयति, केचिदीश्वरं कारणं ब्रुवते, "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव वा" ॥ अपरे स्वभावकारणका ब्रुवते, "केन शुक्लीकृता हंसा मयूराः केन चित्रिताः । स्वभावेनैवे"ति । अत्र संख्याचार्या आहुः, निर्गुणत्वादीश्वरस्य कथं सगुणतः प्रजा जायेरन्, कथं वा पुरुषान्निर्गुणादेव, तस्मात् प्रकृतेर्युज्यते, यथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति कृष्णेभ्यः कृष्ण एवेति, एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते, निर्गुण ईश्वरः, सगुणानां लोकानां तस्मादु-

त्पत्तिरयुक्तेति, अनेन पुरुषो व्याख्यातः, तथा केषांचित् कालः कारणमिति, उक्तं च "कालः पचति भूतानि कालः संहरते जगत् । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः" ॥ व्यक्ताव्यक्तपुरुषास्त्रयः पदार्थाः, तेन कालोऽन्तर्भूतोऽस्ति, स हि व्यक्तः, सर्वकर्तृत्वात् कालस्यापि प्रधानमेव कारणम्, स्वभावोऽप्यत्रैव लीनः, तस्मात् कालो न कारणं नापि स्वभाव इति, तस्मात् प्रकृतिरेव कारणं न प्रकृतेः कारणान्तरमस्तीति न पुनर्दर्शनमुपयाति पुरुषस्य, अतः प्रकृतेः सुकुमारतरं सुभोग्यतरं न किंचिदीश्वरादि कारणमस्तीति मे मतिर्भवति, तथा च लोके रूढम् ॥ ६१ ॥

पुरुषो मुक्तः पुरुषः संसारी, इति चोदिते आह ।

तस्मात् कारणात् पुरुषो न बध्यते नापि मुच्यते नापि संसरति, यस्मात् कारणात् प्रकृतिरेव नानाश्रया दैवमानुषतिर्यग्योन्याश्रया बुद्ध्यहंकारतन्मात्रेन्द्रियभूतस्वरूपेण बध्यते मुच्यते संसरति चेति, अथ मुक्त एव स्वभावात् स सर्वगतश्च कथं संसरति, अप्राप्तप्रापणार्थं संसरणमिति, तेन पुरुषो बध्यते पुरुषो मुच्यते पुरुषः संसरतीति व्यपदिश्यते येन संसारित्वं विद्यते, सत्त्वपुरुषान्तरज्ञानात् तत्त्वं पुरुषस्याभिव्यज्यते, तदभिव्यक्तौ केवलः शुद्धो मुक्तः स्वरूपप्रतिष्ठः पुरुष इति, अत्र यदि पुरुषस्य बन्धो नास्ति ततो मोक्षोऽपि नास्ति, अत्रोच्यते प्रकृतिरेवात्मानं बध्नाति मोचयति च, यत्र सूक्ष्मशरीरं तन्मात्रकं त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते, उक्तं च, "प्राकृतेन च बन्धेन तथा वैकारिकेण च । दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते" ॥ तत् सूक्ष्मं शरीरं धर्माधर्मसंयुक्तम् ॥ ६२ ॥

प्रकृतिश्च बध्यते प्रकृतिश्च मुच्यते संसरतीति कथम्, तदुच्यते ।

रूपैः सप्तभिरेव, एतानि सप्त प्रोच्यन्ते, धर्मो वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यम्, एतानि प्रकृतेः सप्त रूपाणि, तैरात्मानं स्वं बध्नाति प्रकृतिः, आत्मना स्वेनैव, सैव प्रकृतिः पुरुषस्यार्थः पुरु-



षार्थः कर्तव्य इति विमोचयत्यात्मानमेकरूपेण ज्ञानेन ॥ ६३ ॥

कथं तज्ज्ञानमुत्पद्यते ।

एवमुक्तेन क्रमेण पञ्चविंशतितत्त्वालोचनाभ्यासादियं प्रकृतिरयं पुरुष एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते, नास्मि नाहमेव भवामि, न मे मम शरीरं तत्, यतोऽहमन्यः शरीरमन्यत्, नाहमिति, अपरिशेषम्, अविपर्ययाद्विशुद्धम्, विपर्ययः संशयोऽविपर्ययादसंशयाद्विशुद्धं केवलं तदेव नान्यदस्तीति मोक्षकारणमुत्पद्यतेऽभिव्यज्यते ज्ञानं पञ्चविंशतितत्त्वज्ञानं पुरुषस्येति ॥ ६४ ॥

ज्ञाने पुरुषः किं करोति ।

तेन विशुद्धेन केवलज्ञानेन पुरुषः प्रकृतिं पश्यति प्रेक्षकवत् प्रेक्षकेण तुल्यमवस्थितः स्वस्थः, यथा रङ्गप्रेक्षकोऽवस्थितो नर्तकीं पश्यति, स्वस्थः स्वस्मिंस्तिष्ठति स्वस्थः स्वस्थानस्थितः । कथंभूतां प्रकृतिम्, निवृत्तप्रसवां निवृत्तबुद्ध्यहंकारकार्याम्, अर्थवशात् सप्तरूपविनिवृत्ताम्, निवर्तितपुरुषोभयप्रयोजनवशाद्यैः सप्तभी रूपैर्धर्मादिभिरात्मानं बध्नाति तेभ्यः सप्तभ्यो रूपेभ्यो विनिवृत्तां प्रकृतिं पश्यति ॥ ६५ ॥

किंच ।

रङ्गस्थ इति यथा रङ्गस्थ इत्येवमुपेक्षक एकः केवलः शुद्धः पुरुषस्तेनाहं दृष्टेति कृत्वोपरता निवृत्ता, एका एकैव प्रकृतिस्त्रैलोक्यस्यापि प्रधानकारणभूता न द्वितीया प्रकृतिरस्ति मूर्तिवधे जातिभेदात्, एवं प्रकृतिपुरुषयोर्निवृत्तावपि व्यापकत्वात् संयोगोऽस्ति न तु संयोगात् कृतः सर्गो भवति, सति संयोगेऽपि तयोः, प्रकृतिपुरुषयोः सर्वगतत्वात् सत्यपि संयोगे, प्रयोजनं नास्ति सर्गस्य सृष्टेः, चरितार्थत्वात्, प्रकृतेर्हि द्विविधं प्रयोजनं शब्दविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च, उभयत्रापि चरितार्थत्वात् सर्गस्य नास्ति प्रयोजनं यः पुनः

---

(१) एतन्मते—मित्युपरमत्येका इति पाठः ।

सर्ग इति, यथा दानग्रहणनिमित्त उत्तमर्णाधमर्णयोर्द्रव्यविशुद्धौ सत्यपि संयोगे न कश्चिदर्थसंबन्धो भवति, एवं प्रकृतिपुरुषयोरपि नास्ति प्रयोजनमिति ॥ ६६ ॥

यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति ततो मम कस्मान्न भवतीत्यत उच्यते ।

यद्यपि पञ्चविंशतितत्त्वज्ञानं भवति तथापि संस्कारवशाद्धृतशरीरो योगी तिष्ठति, कथम्, चक्रभ्रमवच्चक्रभ्रमेण तुल्यम्, यथा कुलालश्चक्रं भ्रमयित्वा घटं करोति मृत्पिण्डं चक्रमारोप्य पुनः कृत्वा घटं पर्यामुञ्चति चक्रं भ्रमत्येव संस्कारवशात्, एवं सम्यग्ज्ञानाधिगमादुत्पन्नसम्यग्ज्ञानस्य धर्मादीनामकारणप्राप्तावेतानि सप्त रूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि, यथा नाग्निना दग्धानि बीजानि प्ररोहणसमर्थानि, एवमेतानि धर्मादीनि बन्धनानि न समर्थानि । धर्मादीनामकारणप्राप्तौ संस्कारवशाद्धृतशरीरस्तिष्ठति, ज्ञानाद्वर्तमानधर्माधर्मक्षयः कस्मान्न भवति, वर्तमानत्वादेव, क्षणान्तरे क्षयमप्येति, ज्ञानं त्वनागतं कर्म दहति, वर्तमानशरीरेण च यत् करोति तदपीति, विहितानुष्ठानकरणादिति, संस्कारक्षयाच्छरीरपाते मोक्षः ॥ ६७ ॥

स किंविशिष्टो भवतीत्युच्यते ।

धर्माधर्मजनितसंस्कारक्षयात् प्रधानस्य निवृत्तौ ऐकान्तिकमवश्यमात्यन्तिकमनन्तर्हितं कैवल्यं केवलभावान्मोक्ष उभयमैकान्तिकात्यन्तिकमित्येवंविशिष्टं कैवल्यमाप्नोति ॥ ६८ ॥

पुरुषार्थो मोक्षस्तदर्थं ज्ञानमिदं गुह्यं रहस्यं परमर्षिणा श्रीकपिलर्षिणा समाख्यातं सम्यगुक्तम्, यत्र ज्ञाने भूतानां वैकारिकाणां स्थित्युत्पत्तिप्रलया अवस्थानाविर्भावतिरोभावाश्चिन्त्यन्ते विचार्यन्ते, येषां विचारात् सम्यक् पञ्चविंशतितत्त्वविवेचनात्मिका संपद्यते संवित्तिरिति ॥ ६९ ॥ समाप्तोऽयं ग्रन्थः ॥

सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि ।
यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपादकृतम् (१) ॥

---

(१) एतत् पद्यं केनचिल्लेखकादिना निर्मायोपक्षिप्तम्, न ग्रन्थकृन्निर्मितम्, आर्यादिष्वनन्तर्भावादिति ।

creative commons

# Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer